Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# श्रीमद्भानुनाथ-निर्म्मित-व्यवहाररत्नम् ॥

"परसरमा" वास्तव्य विद्वद्वर "श्रीमत्सदाशिवशर्म्म" प्रदर्शितरीत्या तट्टिप्पण्याभूष्य
"तुमौलि" वासिदैवज्ञवर "श्रीमज्जयकान्तशर्म्मणा संशोध्य
काशीस्थ-यज्ञेश्वरयन्त्रालये मुद्रापितम्० ॥ शम्० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ऋद्धिसिद्धिसमयागमन्मतं नोनवीमि यशसे सुधीततम् ।
द्वीन्दुमध्यनवकं व पण्डितं ढुण्ढिराजमुमवासुलालितम्० ॥ १ ॥



PANDITA"SADÁ SHIVA JHÁ. At, Para Sarama, P. O. Sukhapur, D. Bhagalpur.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**भूमिका ।** प्रसिद्ध्यति किल वेदाङ्गतयाऽतिप्रयतभूतसर्व्वमान्याखिलक्ष्मामण्डलप्रचलितशुभाशुभ-कालनिर्णायकज्योतिश्शास्त्रम्० यद्विना केपि यज्ञादि किमपि कर्म्म कर्त्तुं न शक्नुवन्तीति परमधार्म्मिकमैथिलवर्य्यंसद्गुणकशास्त्रिशिरोभूषणश्रीमद्भानुनाथशर्म्मा तिष्ठत्स्वपि मुहूर्त्तविषयकानेकग्रन्थेषु तेषां सर्व्वव्यवहारासाधकत्व-मवगत्य" सर्व्वोपकारायानेकधर्म्मशास्त्रज्योतिश्शास्त्राण्यालोक्य शास्त्रव्यवहाराविरुद्धव्यवहाररत्ननामकममुं ग्रन्थं कृतवान्० तमनेकजनैरसकृत्प्रार्थितविविधविरुदावलीत्यादिवनैलो राजधान्यधिपति-याचककल्पद्रुमश्रीमद्राज-कमलानन्दसिंहमहाशय-प्रतिपालितोहं वि० "परसरमा" राजधान्यधिपतिक्षत्रियकुलावतंसदानि-सद्वीरराजकुमारबाबू "श्रीकीर्त्तिधरनारायणसिंह" विजयिलब्धजोविकसर्व्वशास्त्रवि "च्छ्रीसदाशिव" शर्म्मप्रदर्शितरीत्या टिप्पणीभिः समलङ्कृतय्य यथायुक्ति संशोध्यामुद्रापयम्" अशुद्धं कृपया विशोध्य सफलयन्तु ममायासं धीधनाः इत्याशास्ते ज्यो० "श्रीजयकान्तशर्म्ममैथिलः" मो०तुमौलि०पो०बह्हेड़ा० जि०दरभङ्गा० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ श्रीमत्सरस्वत्यै नमः ॥





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशाय नमः ॥ नत्वा मुकुन्दस्य पदारविन्दं स्वर्गापवर्गद्रुमराजकन्दम् ॥ श्रीभानुनाथः कृतचारुयत्नं करोम्यहं सद्व्यवहाररत्नम् ॥ १ ॥ स्वकृतपरकृताभ्यां संग्रहोऽयं मदीयः सुललितपदरम्यः सर्वलोकाभिरम्यः ॥ निखिलवरकुलानां मैथिलानामिदानीं जनयति परितोषं त्यक्तनिश्शेषदोषम् ॥ २ ॥ काव्यं श्रीभानुनाथस्य प्राचीनगणकस्य च ॥ माधुर्य्यमनयोर्ज्ञेयं शर्कराक्षीरयोरिव ॥ ३ ॥ दुर्जनैरपि क्षन्तव्यमपराधद्वयं मम ॥ सज्जनानां विनोदाय यतो ग्रन्थं करोम्यहम् ॥ ४ ॥ विनोपदेशं खलु बालकानां चेतो विशुद्धिर्न विधानपूर्वा ॥ यतस्ततः प्रागुपदेशमेव क्रमेण वक्ष्यामि हितञ्च तेषाम् ॥ ५ ॥ एकस्मिन्वत्सरे मासाश्चैत्राद्या द्वादशैव हि ॥ तेऽपि नाम्नः प्रभेदेन चत्वारः स्युः प्रकारकाः ॥ ६ ॥ सौरश्च सावन श्चैव नाक्षत्रश्चान्द्र एव च ॥ एतैरेव समस्तोऽपि व्यवहारः प्रवर्त्तते ॥ ७ ॥ विवाहादौ स्मृतः सौरो यज्ञादौ सावनस्तथा ॥ क्षौरपैत्र्यादिके चान्द्रो नाक्षत्रश्च

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिथिव्रते ॥ ८ ॥ रविसंक्रान्तितः सौरः सावनस्तूदयावधिः ॥ नाक्षत्रं भभ्रमादिन्दो श्चान्द्रस्त्रिंश त्तिथेः स्मृतः ॥ ९ ॥ चान्द्रोऽपि द्विविधः प्रोक्तः शुक्लकृष्णानुसारतः ॥ सूर्य्यंचन्द्रान्तरांशैस्तु ज्ञेया द्वादशभिस्तिथिः ॥ १० ॥ अथ तिथीशानाह ॥ वह्निर्ब्रह्माम्बिका चैव गणेशोऽहिर्गुहो रविः ॥ शिवो दुर्गा यमो विश्वे विष्णुः कामः शिवः शशी ॥ ११ ॥ (१) पक्षत्यादितिथीनान्तु पक्षयोरुभयोरपि ॥ एते देवगणाः सर्वे पतयः स्युर्यथाक्रमम् ॥ १२ ॥ अथ तिथीनां विशेषसंज्ञामाह ॥ नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात् ॥ वारत्रयं समावृत्य भवन्ति प्रतिपन्मुखाः ॥ १३ ॥ अथ सिद्धियोगाः ॥ शुक्रे नन्दा, बुधे भद्रा, गुरौ पूर्णा, कुजे जया ॥ शनौ रिक्ता, शुभा ज्ञेया सर्वकार्येषु धीमता ॥ १४ ॥ अथ निन्द्ययोगाः ॥ आदित्यभौमयोर्नन्दा, भद्रा भार्गवचन्द्रयोः ॥ बुधे जया



(१) पक्षस्य मूलं पक्षतिः (प्रतिपदित्यर्थः) पक्षात्तिरिति तिप्रत्ययः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुरौ रिक्ता, शनौ पूर्णातिनिन्दिता ॥ १५ ॥ अथ दग्धतिथिः ॥ चापे मीने द्वितीया च, चतुर्थी वृषकुम्भयोः ॥ षष्ठी मेषे कुलीराख्ये, कन्यायुग्मे तथाष्टमी ॥ १६ ॥ दशमी वृश्चिके सिंहे द्वादशी मकरे तुले ॥ एतास्तु तिथयो दग्धाः शुभे कर्म्मणि वर्जिताः ॥ १७ ॥ अथ भद्राविचारः ॥ अष्टम्यां पूर्णिमायाश्च शुक्ले पूर्वदले स्मृता ॥ एकादश्याश्चतुर्थ्यांश्च तथा भद्रा परे दले ॥ १८ ॥ कृष्णेन्त्यार्द्धे तृतीयायां दशम्यामपि संस्थिता ॥ सप्तम्याञ्च चतुर्द्दश्यां पूर्वे भागे तथैव च ॥ १९ ॥ महद्विध्वंसिनी या च नित्यं दुःखप्रदायिनी ॥ सा भद्रा वर्ज्जनीया स्यात्सर्वकार्य्ये सदा बुधैः ॥२०॥ क्रूरकार्य्ये, खरोष्ट्रादेः क्रयादौ, समरेषु च ॥ भद्रा प्रशस्ता विज्ञेया सर्वथा दैवचिंतकैः ॥२१॥ अथ भद्रावासमाह ॥ आदावष्टघटी स्वर्गे ततः षोडश भूतले ॥ तदूर्द्ध्वं षट्च पाताले भद्रा त्रिंशद्घटीक्रमात् ॥ २२ ॥ स्वर्गे च लभते सौख्यं पाताले च धनागमम् ॥ मर्त्यलोके भवेच्चिन्ता एवं भद्रा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



फलोदितम् ॥ २३ ॥ अथ चन्द्रावस्थितिराशिविशेषेण भद्रावस्थितिमाह ॥ वृषभमिथुनमेषे वृश्चिके
स्वर्ग्गलोकम् ॥ जलचरघटसिंहे कर्क्कटे भूतलेषु ॥ युवतिमृगतुलायां कार्म्मुके नागलोकं भ्रमति
जगदिदं सा कार्य्यनाशाय विष्टिः ॥२४॥ कोजागरोत्सवे चैव होलिकोत्सवकर्म्मणि ॥ भद्रा विव-
र्ज्जनीया स्यान्मिथिलायां विशेषतः ॥ २५ ॥ अथ नक्षत्रस्वामिविचारः ॥ अश्वो यमो नलो ब्रह्मा
द्विजराजस्त्रिलोचनः ॥ देवमाता गुरुः सर्प्पः पितरो भगएव च ॥ २६ ॥ अर्य्यमा द्युमणिस्त्वष्टा
मारुतो वासवानलौ ॥ मित्रो महेन्द्रो निर्ऋतिर्ज्जलं विश्वे विधिस्तथा ॥ २७ ॥ गोविन्दो वसुतो-
येशस्त्वजपाच्च यथाक्रमम् ॥ अहिर्बुध्नश्च पूषा च ऋक्षेशास्ते प्रकीर्त्तिताः ॥ २८ ॥ अथ नक्षत्रा-
णांविशेषसंज्ञामाह ॥ चरं चलं स्मृतं स्वातीपुनर्वसुश्रुतित्रयम् ॥ क्रूरमुग्रं मघा पूर्वात्रितयं भर-
णी तथा ॥ २९ ॥ ध्रुवं स्थिरं विनिर्दिष्टं रोहिणी चोत्तरात्रयम् ॥ तीक्ष्णं दारुणमाश्लेषाज्येष्ठार्द्रामू-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लसंज्ञितम् ॥ ३० ॥ लघु क्षिप्रं स्मृतं पुष्यो हस्तोऽश्विन्यभिजित्तथा ॥ मृदु मैत्रं स्मृतं चित्रानुराधा रेवती मृगः ॥ ३१ ॥ मिश्रं साधारणं प्रोक्तं विशाखा कृत्तिका तथा ॥ नक्षत्रेष्वेषु कर्म्माणि नामतुल्यानि कारयेत् ॥ ३२ ॥ अथ ताराविचारः ॥ जन्मभादिष्टनक्षत्रं गणयित्वा प्रयत्नतः ॥ नवभिश्च हरेद्भागं शेषं ताराः प्रकीर्त्तिताः ॥३३॥ जन्म सम्पद्विपत्क्षेम प्रत्यरिःसाधको वधः ॥ मित्रातिमित्राः प्रख्यातास्ताश्च नामशदृक्फलाः ॥ ३४ ॥ अथ दुष्टताराशान्तिमाह ॥ प्रत्यरौ लवणं दद्याच्छाकमात्रं त्रिजन्मसु ॥ शुद्धं गुणं विपत्तौ च, वधे हेम तिलैः सह ॥ ३५ ॥ अथ चन्द्रावस्थितिविचारः ॥ अश्विनी भरणी सर्वा कृत्तिकैकपदापि च ॥ नवभिर्नवभिः पादैरेवं मेषवृषादयः ॥ ३६ ॥ अथ मेषादीनां संज्ञान्तरमाह ॥ चराख्यश्च स्थिराख्यश्च द्विस्वभावाभिधोऽपि च ॥ त्रिभिस्त्रिभिश्च मेषाद्यैर्ज्ञेया द्वादश राशयः ॥ ३७ ॥ क्रूराक्रूरौ मेषवृषौ युग्मकर्कौ तथैव च ॥ द्वा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भ्यां द्वाभ्यामनेनैव क्रमेण परिकीर्त्तितौ ॥ ३८ ॥ अथ चन्द्रानयनमाह ॥ जन्मराशिं समारभ्य दिनभं गणयेद्बुधः ॥ यावन्मिता भवेत्संख्या तावदेव हि चन्द्रमाः ॥ ३९ ॥ रिष्फाष्टतुर्य्यगं हित्वा सर्वे चन्द्राः शुभप्रदाः ॥ सर्वेषु शुभकार्य्येषु विज्ञेयाः सूरभिः सदा ॥ ४० ॥ अथ चन्द्रवर्णज्ञान-माह ॥ मेषालिसिंहगश्चन्द्रो रक्तवर्णस्तु मध्यमः ॥ वृषकर्कतुलासंस्थः श्वेतः सिद्धिप्रदायकः ॥४१॥ मीने धनुर्द्धरे युग्मे पीतः शर्म्मविवृद्धिदः कन्यामकरकुम्भेषु कृष्णवर्णो भयप्रदः ॥ ४२ ॥ अथ च-न्द्रताराबलकथनम् ॥ कृष्णे बलवती तारा शुक्लपक्षे तु चन्द्रमाः ॥ तयोर्बलं सदा ग्राह्यं सर्वेषु शुभकर्म्मसु ॥ ४३ ॥ मासे तु शुक्लप्रतिपत्प्रवृत्ते पूर्णः शशी मध्यबलो दशाहे ॥ श्रेष्ठो द्वितीयेऽल्प-बलस्तृतीये सौम्यैश्च दृष्टो बलवान् सदैव ॥ ४४ ॥ अथ निषिद्धचन्द्रस्य शान्तिः ॥*॥ शङ्खं दद्याद्द्वि-जातिभ्यो हिमांशौ विफले सति ॥ शङ्खाभावे महत्स्वच्छं तण्डुलं वा नवं दधि ॥ ४५ ॥ अथ घात-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चन्द्राख्यमाह । जन्मेन्दुनन्दार्क मघा च मेषे, वृषे शनिः पंचमहस्तपूर्णाः ॥ स्वाती च युग्मे नवचन्द्रभद्राः कर्केनुराधाबुधयुग्मभद्राः ॥ ४६ ॥ सिंहे जया षट्क शनिश्च मूलं, पूर्णा शनिर्द्विक्श्रवणस्त्रियाञ्च ॥ गुरुस्त्रिरिक्ता शतभे तुले च नन्दालिके रेवतिसप्तशुक्राः ॥४७॥ चापे चतुःशुक्रजयाभरण्यो, मृगेऽष्टमोरोहिणिभौमरिक्ताः ॥ कुम्भे जयार्द्रागुरुरुद्रघाता, झषे भृगुश्चाम्त्यभुजंगपूर्णाः ॥४८॥ विवाहचूडाव्रतबन्धयज्ञे पट्टाभिषेके च तथैव राज्ञः ॥ सीमन्तकार्य्ये खलु जातके च नो घातचन्द्राद्यमिदं विचिन्त्यम् ॥ ४९ ॥ अथ वारविचारः ॥ जीवः शुक्रो बुधश्चन्द्रः शुभाख्यो वासरः स्मृतः ॥ शनैश्चरो महोसूनुः सूर्य्यः पापाभिधो भवेत् ॥ ५० ॥ भास्कराङ्गारकौ रक्तौ, शुक्लौ शुक्रनिशाकरौ ॥ पीतौ बुधगुरू ज्ञेयौ, कृष्णौ राहुशनैश्चरौ ॥ ५१ ॥ अर्कः शुक्रः कुजो राहुः शनिश्चन्द्रो बुधो गुरुः ॥ प्रागादिककुभो नाथाः क्रमात्सूर्य्यादयो ग्रहाः ॥ ५२ ॥ अथ ग्रहराशिवि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चारः ॥ रवौ वर्ज्यांश्चतुः पंच सोमे सप्तद्वयन्तथा ॥ कुजे षष्ठद्वयञ्चैव बुधे पञ्चतृतीयकम् ॥५३॥
गुरौ सप्ताष्टकं चैव शुक्रे वेदतृतीयकौ ॥ शनावाद्यन्तषष्ठश्च प्रहरार्द्धं विगर्हितम् ॥ ५४ ॥ अथ
दिनर्क्षकुयोगम् ॥ रवौ मघानुराधा च, सोमे वैश्वद्विदैवते ॥ भौमे शतभिषार्द्रा च, बुधे मूला
श्विनी तथा ॥ ५५ ॥ मृगो वह्निः सुराचार्य्ये, शुक्रे श्लेषा च रोहिणी ॥ शनौ हस्तश्च पूषा च स-
र्वकार्य्येषु निन्दिताः ॥ ५६ ॥ अथ समयाशुद्धिः ॥ चौलोद्वाहजपव्रतोपनयनाग्न्याधाननीराश-
यान्देवस्थापनकर्णवेधनमहादानादिविद्यामखान् ॥ यात्रापूर्वसुरेक्षणान् गृहवृषोत्सर्गाभिषेकाश्रमान्-
स्ते भार्गवजीवयोर्न्न तनुयान्मासि क्षये चाधिके ॥ ५७ ॥ वक्रे चैवातिचारे च देवतानां गुरोरपि ॥
त्याज्यानि शुभकर्म्माणि सकलानि मनीषिभिः ॥ ५८ ॥ गुरोर्भृगोः शिशुत्वे च वृद्धत्वे ग्रहसंगरे ॥
अतिप्रक्षीणचन्द्रे च न कुर्य्यान्मङ्गलक्रियाम् ॥ ५९ ॥ गुर्वादित्ये गुरौ सिंहे मकरे च तथैव च ॥ ॥६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

याम्यायने हरौ सुप्ते सर्बकर्म्माणि वर्ज्जयेत् ॥ ६० ॥ अथ मन्वादियुगादिविचारः ॥ मन्वादयो युगाद्याश्च रविसंक्रान्तयोऽपि च ॥ मासान्ताश्च परित्याज्या व्रतादिशुभकर्म्मसु ॥ ६१ ॥ अश्वयुक्शुक्लनवमी द्वादशी कार्तिके तथा ॥ तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥ ६२ ॥ फाल्गुनस्याप्यमावास्या पौषस्यैकादशी सिता ॥ आषाढस्यापि दशमी माघमासस्य सप्तमी ॥ ६३ ॥ पुनर्भाद्रे ष्टमी कृष्णा तथाषाढी च पूर्णिमा ॥ कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठीपंचदशी तथा ॥ ६४ ॥ एते मन्वादयः प्रोक्ता गर्गादिमुनिभिः पुरा ॥ युगादिकं च यत्प्रोक्तं तद्वदामि पृथक् पृथक् ॥६५॥ वैशाखशुक्लपक्षे च तृतीयायां कृतं युगम् ॥ कार्त्तिके शुक्लपक्षे तु त्रेता च नवमेहनि ॥ ६६ ॥ द्वापरश्च त्रयोदश्यां कृष्णे भाद्रपदस्य च ॥ माघस्य पूर्णिमायान्तु घोरं कलियुगन्तथा ॥ ६७ ॥ अथोत्पातविचारः ॥ दिशान्दाहे समुत्पन्ने ग्रहणे चन्द्रसूर्य्ययोः ॥ धूलिपाते च निर्घाते धूमपाते

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथैव च ॥ ६८ ॥ द्विसूर्य्ये वा त्रिसूर्य्ये वा छिद्रेणापि च संयुते ॥ रात्रौ धनुषि शाक्रे च कर्द-
मस्यापि वर्षणे ॥ ६९ ॥ केतूद्गमः शोणितवर्षणञ्च धराप्रकम्पः करकानिपातः ॥ उल्काशनीनां
पतनं यदा स्यात्तदा निषिद्धानि दिनानि सप्त ॥ ७० ॥ इति संक्षेपतः प्रोक्तमुपदेशाभिधं मया ॥
श्रेष्ठप्रकरणं यस्मादनेन ज्ञानमुत्तमम् ॥ ७१ ॥ इति मैथिलश्रीभानुनाथदैवज्ञविरचिते व्यवहार-
रत्ने उपदेशप्रकरणम् ॥ १ ॥ ॥ * ॥ सर्वाश्रमाणान्नितराम्बलीयान् गृहाश्रमः प्राज्ञमुनिभिः प्रदिष्टः ॥
तस्मादहं वच्मि गृहक्रियाया विधानमादौ व्यवहारयोग्यम् ॥ १ ॥ अथ वास्तुभूमिज्ञानमाह ॥ पू-
र्वोत्तरप्लवा भूमिः सुप्रसन्ना समापि च ॥ ईशप्लवा निरुच्छिष्टा प्रशस्ता वासकर्म्मणि ॥ २ ॥ द-
क्षिणापरनीचाभूः सोषरा विषमापि वा वृक्षच्छायासमायुक्ता वर्जनीया प्रयत्नतः ॥ ३ ॥ उक्तादन्यस्व-
रूपा तु निषिद्धविहितेतरा ॥ तस्यामपि वसेच्छान्त्याथ वा देवद्विजाज्ञया ॥ ४ ॥ श्वेता च ब्रा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ह्मणी भूमिः क्षत्रियारुणविग्रहा ॥ वैश्या पीततरा ख्याता कृष्णा शूद्राभिधीयते॥ ५ ॥ ब्राह्मणी ब्रा-
ह्मणस्योक्ता क्षत्रिया क्षत्रियस्य च ॥ वैश्या वैश्यस्य निर्दिष्टा शूद्रा शूद्रस्य शस्यते ॥ ६ ॥ हस्त-
मात्रं खनेत्खातं जलेनैव प्रपूरयेत् ॥ पूरिते वास्तुकर्त्ता च गच्छेत्पदशतं पुनः ॥ ७ ॥ समाग-
त्याम्भसो वृद्धिं दृष्ट्वा वृद्धिरनुत्तमा ॥ समे पि स्यान्महावृद्धिं क्षये क्षयमथादिशेत् ॥ ८ ॥ अ-
थ राशीनां वासस्थानमाह ॥ कीटो मीनोऽङ्गना कर्कः कार्मुको युक् क्रियो घटः ॥ आवासे
पूर्वतस्त्याज्याः शेषाः सर्वत्र शोभनाः ॥ ९ ॥ अथ ग्रामवासे धारोपधारज्ञानमाह ॥ अक्षरं
द्विगुणं कृत्वा मात्रां कृत्वा चतुर्गुणां ॥ ग्रामस्य च तथा पुंसो गणयेन्नामवर्णकम् ॥ १० ॥ स-
प्तभिश्च हरेद्भागं शेषाद्वाच्यं फलाफलम् ॥ एकशेषेण शून्येन चतुर्भिश्चैव कन्दलम् ॥ ११ ॥
षट्कं चापि द्वयं यत्र प्राप्यते बहुशो धनम् ॥ पंचकेन त्रयेणापि न लाभो न च वा क्षतिः ॥१२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ नामराशितो ग्रामराशिविचारः ॥ नामभाद्ग्रामराशिः स्याद्द्व्यङ्कपञ्चेशदिग्मितः ॥ तदैव मु-
निभिः प्रोक्तो निवासः शुभदायकः ॥ १३ ॥ अथ ग्रामचक्रविचारः ॥ मस्तके पंच लाभाय मुखे
त्रीणि धनक्षयः ॥ कुक्षौ पञ्च धनं धान्यं षट् पादे स्त्री दरिद्रता ॥ १४ ॥ कण्ठे चैकं प्राणहानि-
र्नाभौ चत्वारि संपदः ॥ गुह्ये चैकं भयं पीडा हस्ते चैकन्तु कन्दलम् ॥ १५ ॥ एकं वामकरे
शोको ग्रामचक्रन्नराकृतिः ॥ गणयेन्नामऋक्षान्तं ग्रामनक्षत्रतः सदा ॥ १६ ॥ अथ ग्रामनाम्नो-
ऽवर्गविचारः ॥ स्ववर्गं द्विगुणी कृत्य परवर्गेण योजयेत् ॥ अष्टाभिश्च हरेद्भागं योऽधिकः सऋणी
भवेत् ॥ १७ ॥ अथ वर्गविचारः ॥ अवर्गात्ताक्ष्यमार्जारसिंहश्वासर्प्पमूषकाः ॥ गजो मृगश्च
वर्गेशाः स्ववर्गात्पञ्चमो रिपुः ॥ १८ ॥ स्वके स्वके च ते स्थाने सर्वे कल्याणदायकाः ॥ अन्य-
द्धिताहितं तेषां लौकिकव्यवहारतः ॥ १९ ॥ अथैषां शरमाह ॥ वसुभूतरसावेदा मुनिश्चन्द्रत्रि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युग्मकम् ॥ पूर्वादिक्रमतो ज्ञेयं वर्गोपरि दिगष्टके ॥ २० ॥ अथ वास्तौ कस्यान्दिशि वस्तव्यं तदाह ॥ ग्रामस्यापि दिशः पुंसोवर्गाङ्कं वर्त्तुलीकृतं ॥ वसुना भाग माहृत्य सूर्य्याद्यं दिक्फलं वदेत् ॥ २१ ॥ सौम्या दशा प्रशस्ता स्यादसौम्या गर्हिता सदा ॥ एवं दशाविचारः स्यान्मध्यमागीष्पतेः स्मृता ॥ २२ ॥ अथ गृहारम्भे मासविचारः ॥ वैशाखे श्रावणे मार्गे फाल्गुने च विशेषतः ॥ गृहारम्भः प्रशस्तः स्यान्मध्यमः कार्तिके शुचौ ॥ २३ ॥ परिशेषास्तु ये मासा ये च न्यूनाधिमासकाः ॥ ते सर्वे वर्जनीयाः स्युर्गृहारम्भे विचक्षणैः ॥ २४ ॥ निषिद्धेपि हि मासादौ सानुकूले शुभे दिने ॥ तृणवस्त्रगृहारम्भे मासदोषो न विद्यते ॥ २५ ॥ अथ पक्षशुद्धिः ॥ शुक्लपक्षे भवेत्सौख्यं, कृष्णे तस्करतो भयम् ॥ इति सामान्यतः प्रोक्ता पक्षशुद्धिर्म्मनीषिभिः ॥२६॥ वस्तुतः पंचमों यावत्कृष्णपक्षस्य धीमता ॥ गृहारम्भः प्रकर्त्तव्यस्तृणदारुमृदादिभिः ॥ २७ ॥

For Private and Personal Use Only

व्य० अथ तिथिशुद्धिः ॥ पूर्णायां प्राग्मुखं शस्तं नन्दायां दक्षिणाननम् ॥ पश्चिमास्यन्तु भद्रायां, ज- र०
॥९॥ यायामुत्तराननम् ॥ २८ ॥ पूर्णिमातोऽष्टमीं यावत्पूर्वास्यं वर्जयेद्गृहम् ॥ उत्तरास्यं न कुर्वीत
नवम्यादिचतुर्द्दशीं ॥ २९ ॥ अमावास्याष्टमीं यावत्पश्चिमास्यं विवर्जयेत् ॥ नवमीतो न याम्या-
स्यं यावच्छुक्लचतुर्द्दशीम् ॥ ३० ॥ शुक्लप्रदिपदं ऋक्तां मासान्ताच्च दिनत्रयम् ॥ अवमाद्यं गृहा-
रम्भे यत्नतः परिवर्ज्जयेत् ॥ ३१ ॥ अथ नक्षत्रविचारः ॥ मूलाजपादसंयुक्ते मृदुक्षिप्रचरध्रुवे ॥
वास्तुकर्म्म शुभं प्रोक्तं गृहारम्भन्तथैव च ॥ ३२ ॥ छेदनं तृणकाष्ठानां संग्रहश्च विशेषतः ॥ भू-
तिकामो न कुर्वीत षट्केन श्रवणादिना ॥ ३३ ॥ अथ गृहारम्भे वारविचारः ॥ रवावग्निः, कुजे
नाशः, शशिन्यस्त्वं, शनौ भयम् ॥ सुरेज्ये भार्गवे सौम्ये गृहारम्भम्मनोरमम् ॥ ३४ ॥ अथ
योगशुद्धिः ॥ वज्रव्याघातयोगेषु व्यतीपातेऽतिगण्डके ॥ विकुम्भे गण्डयोगे च गृहारम्भन्न का- ॥९॥

रयेत् ॥ ३५ ॥ अथ सम्मुखराहुविचारः ॥ त्रिभिस्त्रिभिश्च मार्गाद्यै राहुस्तिष्ठति पूर्वतः ॥ विपरीतक्रमेणैव द्वारं सम्मुखतस्त्यजेत् ॥ ३६ ॥ अन्यवेस्मस्थितं दारु नैवान्यस्मिन् प्रयोजयेत् ॥ न तत्र वसते कर्त्ता वसन्नपि न जीवनम् ॥ ३७ ॥ नूतने नूतनं काष्ठं जीर्णे जीर्णं प्रशस्यते ॥ न जीर्णे नूतनं श्रेष्ठं नो जीर्णं नूतने तथा ॥ ३८ ॥ द्वारस्य सम्मुखे द्वारं द्वारं द्वारोपरिस्थितम् ॥ नैव कुर्याद्धनाकांक्षी पुत्राकांक्षी विशेषतः ॥ ३९ ॥ अथ गृहे शिल्पादिक्रियाविचारः ॥ ध्रुवे मैत्रे चरे क्षिप्रे जीवे सौम्ये खलग्नगे ॥ चन्द्रे गुरुज्ञवर्गस्थे शिल्पारम्भः प्रशस्यते ॥ ४० ॥ उलू-ककाकगृध्राश्च व्याघ्र-सिंहवराहकाः ॥ पिशाचा राक्षसाः क्रूराः संग्रामं रोदनं तथा ॥ ४१ ॥ इ-न्द्रजालवदन्यानि प्रपंचचरितानि च ॥ भीषणानि च सर्वाणि गृहचित्रे विवर्जयेत् ॥ ४२ ॥ अथ गृहकरणार्थं वास्तुविचारः ॥ यदुक्तं भवनारम्भे शुभं वाप्यशुभं बुधैः ॥ तदेव तिथिमासाद्यं

विज्ञेयं वास्तुकर्म्मणि ॥ ४३ ॥ विशेषाच्छ्रवणाषट्कं शनिवासरमेव च ॥ गृहीत्वा पूजयेद्भूमिं शकुनं च विचारयेत् ॥ ४४ ॥ अथ लग्नशुद्धिः ॥ मेषे भूयो भवेद्यात्रा कर्क्कटे नाशमाप्नुयात् ॥ तुलोदये भवेद्व्याधिर्द्धान्यनाशो मृगोदये ॥ ४५ ॥ अन्ये ये राशयश्चाष्टौ वास्तुकार्य्ये शुभावहाः ॥ तेषां नवांशकाद्यास्तु भागास्तत्तुल्यपाकदाः ॥ ४६ ॥ अथ सामान्यतोगृहशुद्धिविचारः ॥ त्रिषड्दशायसंस्थाश्च सर्वे खेटाः शुभावहाः त्रिकोणे प्यथवा केन्द्रे शुभा एव शुभप्रदाः ॥ ४७ ॥ अथ गृहप्रवेशविचारः ॥ वास्तौ वापि गृहारम्भे यदुक्तञ्च शुभाशुभम् ॥ तदेवात्रापि विज्ञेयं प्रवेशे नव्यवेस्मनः ॥ ४८ ॥ किञ्चित्किञ्चिद्विशेषो यः प्रवेशे नवसद्मनः ॥ वक्ष्यमाणविधानेन विज्ञेयः शुभमिच्छता ॥ ४९ ॥ अथ मासविचारः ॥ माघफाल्गुनवैशाखज्यैष्ठमासेषु शोभनः ॥ प्रवेशो मध्यमो ज्ञेयो मार्गकार्त्तिकमासयोः ॥ ५० ॥ श्रावणेपि च केचित्तु प्रवदन्ति मनीषिणः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सप्तम्यादिसकाराणां सप्तानां कारणे न च ॥ ५१ ॥ अथ तिथिविचारः ॥ अमावास्या च षष्ठी च ऋक्ता शुक्लस्य पक्ष तिः अष्टमी संमुखः शुक्रो वर्ज्जनीयाःप्रवेशके ॥ ५२ ॥ अथ नक्षत्रविचारः ॥ कृतिकाद्यास्तु पूर्वादौ सप्त सप्तोदिताः क्रमात् ॥ यद्दिश्यं यच्च नक्षत्रं तत्र तस्य प्रवेशनम् ॥ ५३ ॥ अथ वामरविविचारः ॥ रन्ध्रात्पुत्राद्धनादायात्पञ्चस्वर्के स्थिते क्रमात् ॥ पूर्वाशादिमुखं गेहं विशेद्वामो भवेद्यतः ॥ ५४ ॥ अथ कामिन्या श्चुह्लिकोपरि मृद्भाण्डस्थापनविचारः ॥ चुह्लिकोपरि मृद्भाण्डं स्थापयेन्नैव कामिनी ॥ भृगुचन्द्रमसोर्वारे स्नायान्नैव च वारुणे ॥ ५५ ॥ अथ प्रवेशविधानमाह ॥ पुष्पाक्षतैरमरदैवविदिष्टसाधूनभ्यर्च्य संभृतसिताम्वरसाधुवेषः ॥ पुण्याहशंखपटहध्वनितूर्य्यघोषैर्द्वारेण भूम्यधिपतिः प्रविशेत्सुवेस्म ॥ ५६ ॥ अथ गृहदेव्याःस्थापनविधिः ॥ श्रीप्रदं सर्वगीर्वाणस्थापनञ्चोत्तरायणे ॥ विचैत्रेष्वेव मासेषु माघादिषु च पंचसु ॥ ५७ ॥ वलक्षपक्षः शुभदः

For Private and Personal Use Only

समस्तः सदैव तत्राद्यदिनं विहाय ॥ अन्त्यं त्रिभागं परिहृत्य कृष्णपक्षोऽपि शस्तः शुभवासरश्च ॥ ५८ ॥ याम्यायनेऽपि देवीनां स्थापनं नवरात्रिषु ॥ प्रशस्तं कार्त्तिके विष्णोर्भाद्रे कलशजन्मनः ॥ ५९ ॥ ऋक्ताऽवमकुयोगाद्यं वर्ज्जयित्वा प्रयत्नतः ॥ सुराणां स्थापनं कुर्य्याद्योगापन्ने शनावपि ॥ ६० ॥ हस्तत्रये मित्रहरित्रये च पौष्णद्वयादित्यसुरेज्यभेषु ॥ तिस्रोत्तराधातृशशाङ्कधिष्णे सर्वामरस्थापनमुत्तमं स्यात् ॥ ६१ ॥ स्थाप्यो हरौ दिनकरो मिथुने महेशो नारायणश्च युवतौ घटभे विधाता ॥ देव्यो द्विमूर्त्तिभवनेषु निवेशनीयाश्छुद्राश्चरे स्थिरगृहे निखिलाश्च देवाः ॥ ६२ ॥ अथ गृहसमीपे शुभाशुभवृक्षकथनम् ॥ यत्र तत्र स्थिता वृक्षा विल्वदाडिम्बकेशराः पनसो नारिकेलश्च शुभं कुर्वन्ति नित्यशः ॥ ६३ ॥ जम्वीरश्च रसालश्च रम्भाशेफालिकास्तथा यवाशोकशिरीषाश्च मल्लिकाद्याः शुभप्रदाः ॥ ६४ ॥ मालतीञ्चैव चम्पाश्च केतकीं कुन्दमेव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च ॥ मुनिवृक्षं ब्रह्मवृक्षं वर्ज्जयेद्गृहसन्निधौ ॥ ६५ ॥ तिन्तिलीको वटः प्लक्षः पिप्पलश्च सकोटरः ॥ क्षोरो च कंटकी चैव निषिद्धास्ते महीरुहाः ॥ ६६ ॥ षर्ज्जूरी दाडिमी रम्भा कर्कन्धू बीजपूरिका उत्पद्यन्ते गृहे यत्र तस्मिन् कृन्तति मूलतः ॥ ६७ ॥ वृक्षप्रासादिनी-च्छाया-सच्छन्नं यदि मंदिरं ॥ अचिरेणैव कालेन उद्वसं जायते ध्रुवं ॥ ६८ ॥ यामादूर्ध्वन्तु या छाया वृक्षप्रासादसम्भवा ॥ वर्ज्जयेत्तां प्रयत्नेन यावद्वै प्रहरद्वयं ॥ ६९ ॥ प्रथमान्तयामवर्ज्जं द्वित्रिप्रहरसम्भवा ॥ छाया वृक्षध्वजादीनां सदा दुःखप्रदायिनी ॥ ७० ॥ अथ वृक्षरोपणदिवसमाह ॥ शुक्लपक्षे तिथौ शस्ते शुक्रे चन्द्रे गुरावपि ॥ तरूणां रोपणं शस्तं ध्रुवक्षिप्रमृदूडुभिः ॥ ७१ ॥ शोभ्यन्तास्तिथयः कुजार्कशनयो वाराश्च षष्ठोयुता मासः प्रौष्ठपदस्त्रिविक्रममुखं नक्षत्रषट्कं तथा ॥ त्यक्त्वैतान् वृषसिंहवृश्चिकघटेष्वङ्केषु भद्रां विना गर्गाद्याः कदलीक्षुरोपणविधिः शस्तं जगुः सर्वदा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ७२ ॥ इति श्रीभानुनाथदैवज्ञविरचिते व्यवहाररत्ने गृहारम्भादिप्रकरणम् ॥२॥ S. S. JHA.

विनाहलप्रवाहाद्यैरन्नं निर्वाहः कलौ युगे ॥ चतुर्णामपि वर्णानामतस्तत्प्रथमं ध्रुवे ॥१॥ अथ हलप्रवाहे तिथिशुद्धिः ॥ सप्तम्येकादशी चैव पंचमी दशमी तथा ॥ त्रयोदशी तृतीया च प्रशस्ता हलकर्म्मणि ॥ २ ॥ मृदुध्रुवक्षिप्रचरेषु मूलमघाविशाखासहितेषु भेषु ॥ हलप्रवाहं प्रथमं विदध्यान्नीरोगमुष्कान्वितसौरभेयैः ॥ ३ ॥ विः कुम्भवज्रव्यतिपातगण्डातिगण्डमन्दारदिनं विहाय ॥ सम्पूज्य दूर्वाक्षतगंधपुष्पैर्हलं विदध्यात्कृषिकर्म्मकर्त्ता ॥ ४ ॥ हलप्रवाहवद्बीजवपनस्य विधिः स्मृतः ॥ रोपणे सर्वशस्यानां कर्त्तने प्रथमेपि च ॥ ५ ॥ अथ नवान्नभक्षणविचारः ॥ वृश्चिके पूर्वभागे तु माघे वापि च फाल्गुनेसत्तिथौ शुक्लपक्षे च पंचम्यन्ते सितेतरे ॥ ६ ॥ मृदुक्षिप्रचरर्क्षेषु सत्तनौ सत्क्षणेषु च ॥ हुत्वा वह्नौ विधानेन नवान्नं भक्षयेत्सुधीः ॥ ७ ॥ अथ निषेधविचारः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नवान्नं नैव नन्दायां न प्रसुप्ते जनार्द्दने ॥ नापराह्णे न चापेर्के तुलार्के न कदाचन ॥ ८ ॥ न चैत्रे न त्रयोदश्यां न द्विदैवस्थिते रवौ ॥ न कुजार्किसि*ते वारे न तारासु त्रिजन्मसु ॥ ९ ॥ अथ नूतनताम्बूलफलभक्षणविचारः ॥ पुष्योत्तरादितिदिवाकरवाजिपौष्णमूलानुराधवसुबासवबैष्णवेषु ॥ वारेषु सौरिधरणीसुतबारवर्ज्ज्यं ताम्बूलनूतनफलाद्यशनं शुभाय ॥ १० ॥ अथ धान्यादिमर्द्दनस्थानविचारः ॥ प्रसन्नभूमौ पुरसन्निधाने प्रोत्तुङ्गदेशेषु खलं विदध्यात् ॥ वन्ध्याप्रदेशे च पथे च निम्ने भीरुप्रदेशे खलको न कार्य्यः ॥ ११ ॥ अथ मेधिस्थापनविचारः ॥ बटोदुम्बरनीपानां शाखोटवदरस्य च ॥ शाल्मल्या मुशलेनैव मेधिं कुर्य्याद्विचक्षणः ॥ १२ ॥ कपित्थविल्वबंशानां न च मेधिं कदाचन ॥ न पौषे न च ऋक्तार्या न कुजार्किदिने तथा ॥ १३ ॥ मृदुक्षिप्रचरर्क्षेषु खाते

* विषघस्यां मष्टमचन्द्रे कृष्णपक्षीयषष्ठ्यादिषु मघा-पूर्व्व-भरणी-श्लेषार्द्रास्वपि नेत्यप्यवधेयम् । S. S. J.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्रव्यं नियुज्य च ॥ संपूज्य धान्यवद्धाग्रां मेधिं संस्थापयेद्बुधः ॥ १४ ॥ अथ कणमर्दनार्थदिवसमाह ॥ भाग्यार्यमश्रुतौ मूले धातृमैत्रमघासु च ॥ पौष्णेन्द्रर्क्षे शुभाहे च धान्यानां मर्दनं शुभम् ॥ १५ ॥ अथ बीजरक्षणदिवसमाह ॥ रोहिणी रेवती मूलं स्वाती हस्तो मृग स्तथा ॥ आषाढोत्तरयुक्ता च तदा भाद्रपदा मघा ॥ १६ ॥ शस्यादिसर्वधान्यानां शुभे वारे स्थिरोदये ॥ गर्गादमुनिभिः प्रोक्ता प्रशस्ता बीजबन्धने ॥ १७ ॥ अथ गृहादौ धान्यादिस्थापनविचारः ॥ रोहिण्युत्तरपुष्येषु भरणीशक्रनैर्ऋते ॥ पौष्णार्काश्विविशाखासु हरिमित्रपुनर्वसौ ॥ १८ ॥ चित्रावसुमघायाश्च जीवार्केन्दुभृगो दिने ॥ तथा तिथावक्तायां शस्यानां स्थापनं हितम् ॥ १९ ॥ अथ गृहाद्धान्यनिष्काशनविचारः ॥ उत्तराम्बुपविशाखवासवे चन्द्रभौमगुरुशुक्रवासरे ॥ गेहतो बहुतरायवृद्धये धान्यनिःक्रमणमाह पण्डितः ॥ २० ॥ अथ वृद्ध्यर्थधान्यादिप्रक्षेपदिवसमाह ॥



For Private and Personal Use Only

श्रवणात्रयं विशाखाध्रुवपूर्वपुनर्वसूनि ऋक्षाणि ॥ पुष्याश्विन्यौ ज्येष्ठा धनधान्यविवृद्धये कथिता ॥२१॥
अथ धान्यादिमूल्यज्ञानमाह ॥ रौद्राहियाम्यानिलवारुणेन्द्राण्याहुर्जघन्यानि तथा वृहन्ति ॥ ध्रु-
वह्निदैवादितिभानि नूनं समानि शेषाणि पुनर्म्मुनीन्द्राः ॥ २२ ॥ जघन्ये यदि संक्रान्ति र्ज्ञेया-
न्नस्य महार्घता ॥ वृहत्संज्ञे समर्घत्वं समत्वं समसंज्ञके ॥ २३ ॥ अथ रव्यादिवारे संक्रमणफल-
माह ॥ सूर्य्यारशनिवारेषु यदा संक्रमते रविः ॥ तदा क्रमाद्भयं विद्याद्राजपावकतस्करैः ॥२४॥
सुभिक्षं क्षेममारोग्यं वारे च बुधसोमयोः ॥ शस्यानां जायते वृद्धिर्गुरुभार्गववासरे ॥ २५ ॥ अथ
पूर्वाह्नादिषु संक्रान्तिफलमाह ॥ नृपाः पीडन्ति पूर्वाह्ने मध्याह्ने तु द्विजोत्तमाः ॥ अपराह्ने तु वैश्याश्च
शूद्राश्चास्तमिते रवौ ॥ २६ ॥ पिशाचाद्याः प्रदोषेषु अर्द्धरात्रे तु राक्षसाः ॥ रात्रेस्तृतीयभा-
गेषु पीडा ते नटनर्त्तकाः ॥ २७ ॥ उषःकाले तु संक्रान्तौ हताः पाखण्डकारकाः ॥ हन्ति प्र-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्वजितान् सर्वान्त्संध्याकाले न संशयः ॥ २८ ॥ अथ पुण्यकालव्यवस्था ॥ अर्वाक्षोडश विज्ञेया नाडयः पश्चाच्च षोडश ॥ कालःपुण्योऽर्कसंक्रान्तौ विद्वद्भिः परिकीर्त्तितः ॥ २९ ॥ रजन्याः पूर्वभागे तु यदा संक्रमते रविः ॥ तदा पूर्वदिनस्यैव पराह्णे पुण्यनाडिकाः ॥ ३० ॥ परभागे यदा रात्रे र्भानोः संक्रमणं भवेत् ॥ तदा परदिनस्यादौ पुण्याख्या नाडिकाः स्मृताः ॥ ३१ ॥ पूर्णे निशीथकाले तु संक्रान्ति र्य्यदि जायते ॥ तदा दिनद्वये पुण्यमिति प्राहु र्मुनीश्वराः ॥ ३२ ॥ कर्क्कटस्य मृगस्यापि विशेषा*र्थोऽस्ति संक्रमे ॥ तन्नोक्तं विस्तृतित्रासाद्व्यवहारोऽपि कुण्ठितः ॥ ३३॥

---

* विशेषमाह कर्क्क-वृष-सिंह-वृश्चिक-कुम्भ-संक्रांतिषु आद्याः षोडश घट्यः "तुलामेषयोर्म्मध्याः ( अष्टौ प्राक् परतश्चाष्टाविति ) मिथुन-कन्या-धनु-र्म्मीन-मकर-संक्रान्तिषु संक्रान्तिकालात्पराः षोडश नाड्यः पुण्यदाः " तथा च " याम्यायने विष्णुपदे चाद्यमध्यास्तुलाऽजयोः । षडशीत्यानने सौम्ये परा नाड्योतिपुण्यदाः । इति मु० चि० S. S. J.



For Private and Personal Use Only

अथ प्रथमहट्टवासस्तक्रमाह ॥ रविभाच्चन्द्रनक्षत्रैः फलं ज्ञेयं शुभाशुभम् ॥ हट्टायां चक्रमाख्यातं गर्गादिमुनिभाषितम् ॥ ३४ ॥ आसने च द्वयञ्चैव मुखे चैव द्वयं भवेत् ॥ आग्नेये चतुरो दद्या त्तथा चत्वारि नैरृते ॥ ३५ ॥ प्रत्यङ्मुखे त्रयन्दद्याद्वायुकोणे चतुष्टयम् ॥ ऐशान्याञ्च त्रयं दद्यान्मध्ये चत्वारि विन्यसेत् ॥ ३६ ॥ फलमस्य ॥ आसने सर्वसौख्यञ्च मुखे च भुवि यातना ॥ आग्नेय्यामर्थनाशं च नैरृत्याञ्च सुखप्रदम् ॥ ३७ ॥ प्रत्यङ्मुखे महत्सौख्यं वायुकोणे तथोद्वसम् ॥ ऐशान्यां सर्वहानिः स्यान्मध्यकोणे शुभप्रदम् ॥ ३८ ॥ कुम्भलग्नमपहाय साधुषु द्रव्यकर्म्मभवमूर्तिवर्तिषु ॥ अव्ययेषु शुभदायुषुद्गमं भार्गवे विपणिरिन्दुसंयुते ॥ ३९ ॥ अथ क्रयविक्रयविचारः ॥ यमाहिशक्राग्निहुताशपूर्वा नेष्टाः क्रये,, विक्रयणे तु शस्ताः ॥ पौष्णाश्विचित्राशतविष्णुवाताः क्रये हिता,, विक्रयणे निषिद्धाः ॥ ४० ॥ अथ द्रव्याप्यामृणदानप्रयोग-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिवसविचारः ॥ तीक्ष्णमिश्रध्रुवोग्रैर्यद्द्रव्यं दत्तं निवेशितम् ॥ प्रयुक्तश्च विनष्टश्च विष्ट्यां पाते च 
 नाप्यते ॥ ४१ ॥ न कुजार्के न संक्रान्तौ न वृद्धौ न करर्क्षके ॥ ऋणं विपश्चिता ग्राह्यं न देयं बुध-
 वासरे ॥ ४२ ॥ स्वात्यादित्यद्विदैवेषु मृदुपुष्यश्रुतित्रये ॥ सुताष्टधर्म्मसंशुद्धे चरे कुर्याद्धनक्रि-
याम् ॥ ४३ ॥ अथ गवां क्रयविक्रयादिविचारः ॥ क्षिप्रे शाक्रे धनिष्ठायां द्विदैवे वारुणेपि च ॥ अ-
दित्यां पौष्णभे शस्तौ गवाश्च क्रयविक्रयौ ॥ ४४ ॥ प्राजेशचित्रश्रवणोत्तरासु चतुर्दशीदर्शदि-
नाष्टमीषु ॥ गवान्न कुर्यात्क्रयविक्रयश्च स्थानं प्रवेशं गमनं कथञ्चित् ॥ ४५ ॥ यदुक्तं गोक्रि-
यायाञ्च तिथिवासरभादिकम् ॥ तदेवाजमहिष्यादेः प्रक्रियायां शुभाशुभम् ॥ ४६ ॥ अथ वा-
जिनां क्रयविक्रयादिदिवसमाह ॥ क्षिप्रान्त्यवसुचान्द्रेषु स्वात्यादित्यजलेषु च ॥ विरिक्तारदिने
प्रोक्तं वाजिकृत्यं मनीषिभिः ॥ ४७ ॥ तिष्याश्विधातृकरसौम्यमघानुराधापौष्णोत्तरादितिमरुद्द्वय- 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वैष्णवेषु ॥ वागीशशुक्रशशिसौम्यदिने सुलग्ने रिक्तां विहाय निगदन्ति गजाख्यकार्य्यम् ॥ ४८ ॥ अथाश्वादियानारोहणदिवसमाह ॥ जीवेन्दुसौम्यार्कसिते च वारे पौष्णाश्विचित्रानिलवासुदेवे ॥ हस्तेम्बुपुष्ये श्रवसीन्दुशुद्धे आरोहणं वाजिरथेभकानाम् ॥ ४९ ॥ अथ गजदन्तच्छेदनदिवसमाह ॥ धिष्ण्येषु वैष्णवाश्विनितिष्यधनादित्यहस्तचित्रासु ॥ सुतिथौ शुभवासरेषु च दन्तच्छेदश्च दन्तिनामुक्तम् ॥ ५० ॥ भौमार्कजयोर्वारे दिवसपतौ गुरुगृहे हरौ सुप्ते ॥ पक्षे सिते निशायां द्विरदानां कल्पना नेष्टा ॥ ५१ ॥ अथ मंत्रग्रहणसमयमाह ॥ चैत्रे दुःखाय दीक्षा स्याद्वैशाखे सर्वसिद्धिदा ॥ ज्येष्ठे मृत्युप्रदा सा स्यादाषाढे बन्धुनाशिनी ॥ ५२ ॥ श्रावणे पुत्रदा नृणां नभस्ये दुःखदा स्मृता ॥ आश्विने सर्वसिद्धौ स्यात्कार्त्तिके ज्ञानसिद्धिदा ॥ ५३ ॥ शुभदा मार्गशीर्षे च पौषे ज्ञानविनाशिनी ॥ माघे मेधादिवृद्धिः स्यात्फाल्गुने विजयप्रदा ॥ ५४ ॥ कृष्णपक्षे न कल्याणं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाञ्छितप्रतिबंधकृत् ॥ शुक्ले वाञ्छितसिद्धिः स्याद्द्रव्यलाभः शुभप्रदः ॥ ५५ ॥ द्वितीया च
तृतीया च पंचमी सप्तमी तथा दशम्येकादशी चैव द्वादशी च तथैव च ॥ ५६ ॥ एता अतिप्रश-
स्ताः स्यु र्दीक्षाग्रहणकर्म्मणि ॥ षष्ठी च नवमी चैव तथा चान्या समाःस्मृताः ॥ ५७ ॥ अथ नक्षत्र-
शुद्धिः ॥ स्थिरर्क्षे मृगशीर्षे च तथा चित्रानुराधयोः पौष्णे च वसुभे चैव दीक्षाकर्म्म प्रशस्यते
॥ ५८ ॥ कुजार्कजौ परित्यज्य सुमुहूर्त्ते शुभोदये ॥ ताराचन्द्रानुकूले च मन्त्रग्रहणमुच्यते ॥५९॥
चन्द्रसूर्य्यग्रहे चैव सिद्धिक्षेत्रे सुरालये ॥ प्रोक्तमेतत्तु दीक्षायां सुधीभिर्न्नैव चिन्तयेत् ॥ ६० ॥
अथ मैत्रीकरणदिवसमाह ॥ पुष्येन्दुमित्रभाग्येषु द्वादश्यां शुभवासरे अष्टम्यां वा स्थिरे लग्ने मै-
त्रीकरणमुत्तमम् ॥ ६१ ॥ इति खौआल कुलानन्द चन्दननन्दनोपाध्यायसुत श्री भानादैवज्ञ विरि-
चिते व्यवहाररत्ने कृष्यादिप्रकरणम् ॥ ३ ॥ S. S. J. ॥ गृहस्थानां परो धर्म्मः पाणिग्रहणमेव



For Private and Personal Use Only

च ॥ तस्मात् तत्समयः स्वोयदेशरीत्योच्यतेधुना ॥ १ ॥ द्वितोया दशमी चैव तृतीयैकादशो तथा । पंचमी सप्तमो चैव प्रशस्तोद्वाहकर्म्मणि ॥ २ ॥ वर्जनोया कुहू ऋक्ता शेषाः स्युर्म्मध्यमाः स्मृताः । कुजार्कशनिवाराश्च परित्याज्याः प्रयत्नतः ॥ ३ ॥ वारवेलां च भद्रां च मासान्तदिवसानि च ॥ दग्धां तिथिं च भान्ते च यत्नतः परिवर्ज्जयेत् ॥ ४ ॥ जन्मर्क्षपुष्यनक्षत्रं ग्रहोत्पातयुतं दिनम् षट्काष्टकं च दम्पत्योरुद्वाहे संत्यजेद्बुधः ॥ ५ ॥ याम्यायने विमार्गे च परित्यज्य विचक्षणैः । सौम्यायने विचैत्रे तु प्रकुर्य्यात् पाणिपीडनम् ॥ ६ ॥ रोहिण्युत्तररेवत्यो मूलं स्वातो मृगो मघा । अनुराधा च हस्तश्च विवाहे मंगलप्रदः ॥ ७ ॥ कन्यामिथुनमीनेषु वृषचापतुलासु च ॥ उद्वाहः सुप्रशस्तः स्यादिति प्राह पराशरः ॥ ८ ॥ **अथ गणविचारः** ॥ हस्तः पुष्यः श्रुतिः स्वाती मृगः पौष्णः पुनर्वसू । अनुराधाश्विनी चैव कथितो देवतागणः ॥ ९ ॥ त्रिपूर्व्वा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्र्युत्तराप्यार्द्रा रोहिणी भरणी तथा । मनुष्याख्यो गणः प्रोक्तो ज्योतिश्शास्त्रविशारदैः ॥ १० ॥ मघा श्लेषा विशाखा च कृत्तिका शततारकाः । चित्रा ज्येष्ठा धनिष्ठा च मूलं रक्षोगणः स्मृतः ॥ ११ ॥ स्ववर्गे परमा प्रीतिर्मध्यमा देवमर्त्ययोः ॥ मर्त्यराक्षसयोर्मृत्युः कलहो देवरक्षसोः ॥ १२ ॥

अथ वर्णविचारः ॥ झषालिकर्कटा विप्राः क्षत्री मेषोहरिर्द्धनुः । वृषः कन्या मृगो वैश्यः शूद्रो युग्मं तुला घटः ॥ १३ ॥ वरस्य वर्णतः कन्या नाधिकाऽशुभदा स्मृता ॥ समा च मध्यमा ज्ञेया नीचवर्णा सदा शुभा ॥१४॥

अथ योनिविचारः ॥ अश्विनी शततारा च वाजियोनिः स्मृता बुधैः । तथैव भरणी पौष्णो गजयोनिर्विधीयते ॥ १५ ॥ पुष्यः कृशानुश्छागाख्यौ नागाख्यौ रोहिणीमृगौ आर्द्रामूलमपि श्वानौ मूषकः फाल्गुनी मघा॥ १६ ॥ मार्जारो दितिरश्लेषा गोजातिरुत्तरात्रयम् *लुलायौ

*लुलायौ महिषावित्यर्थः ( लुलायो महिषो वाहद्विषत्कासरसैरिभा ) इत्यमरकोषोक्तेः ॥ S. S. J.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वातिहस्तौ च ज्येष्ठामैत्रौ मृगाभिधौ ॥ १७ ॥ चित्राद्दिदैवते व्याघ्रौ श्रुत्याषाढौचमर्कटौ पूभा धनिष्ठा सिंहाख्यौ नकुलश्चाभिजित्स्मृतः ॥ १८ ॥ आसां प्रोक्तभयोनीनां मित्रता शत्रुतापि च ॥ चिन्तनीया विवाहेषु लौकिकव्यवहारतः ॥ १९ ॥ अथ बधूप्रवेशविचारः ॥ विबाहतः षोडशवासरान्तरं समाद्रिपञ्चांकदिने प्रशस्तः ॥ वधूप्रवेशो विषमेऽह्नि मासे संवत्सरे वापि तदग्रतः स्यात् ॥ २० ॥ हस्तत्रये ब्रह्मयुगे मघायां पुष्ये धनिष्ठाश्रवणोत्तरेषु मूलानुराधाहयरेवतीषु स्थिरेषु लग्नेषु वधूप्रवेशः ॥ २१ ॥ जोवेन्दुशुक्रेषु शनैश्चरे च वधूप्रवेशः शुभदो नराणाम् ॥ षष्ठ्यष्टमी विष्णुयुता च रिक्ता सदा निषिद्धा बुधवासरं च ॥ २२ ॥ न शुक्रदोषो न च सूर्य्यदोषः तारावलं नेन्दुवलं न योज्यम् ॥ उद्वाहिताया नवकन्यकायाः प्रोक्ते दिनादौ किल कोविदेन ॥ २३ ॥ प्रयाणोक्ते प्रयाणः स्यात् प्रवेशोक्ते प्रवेशकः ॥ सुन्दरीशर्म्मगीतेन वाद्येन सह शोभनः ॥ २४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वसेतां दम्पती तत्र वंशनागादिचित्रिते । स्थाने निवृत्तिमैथुन्यौ यावद्रात्रिचतुष्टयम् ॥ २५ ॥ विवाहात्
प्रथमे पौषे नाषाढे नाधिमासके । श्वश्रूगेहे वसेन्न स्त्री चैत्रे तातगृहे तथा ॥ २६ ॥ अथ
द्विरागमनादिविचारः ॥ ओजे संवत्सरे वध्वा द्विरागमनकर्म्म च ॥ घटालिमेषगे सूर्य्ये द्वरगां-
शेषु शुभं स्मृतम् ॥ २७ ॥ मृदुध्रुवक्षिप्रचरेपि मूले तिथौ गमोक्ते शुभवासरे च ॥ रवीज्यशुद्धे
समये वधूनां द्विरागमः शुक्रदले प्रशस्तः ॥ २८ ॥ दक्षिणः संमुखः शुक्रो द्विरागमन एव हि ।
दम्पत्योः सौख्यवृद्ध्यर्थं त्यक्तव्यः सर्वदा बुधैः ॥ २९ रेवत्यादि-मृगान्तं च यावत् तिष्ठति चंद्रमाः ॥
तावच्छुक्रो भवेदन्धः संमुखो दक्षिणोपि सन् ॥ ३० ॥ उदयति दिशि यस्यां याति यत्र भ्रमाद् वा
विचरति च भचक्रे येषु दिग्द्वारभेषु ॥ त्रिविधमिह सितस्य प्रोच्यते संमुखत्वम् । मुनिभिरुदय
एव त्यज्यते तत्र यत्नात् ॥ ३१ ॥ काश्यपेषु वसिष्ठेषु भृग्वत्र्यांगिरसेषु च । भारद्वाजेषु वात्सेषु



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिशुक्रो न दुष्यति ॥ ३२ ॥ पृष्ठे ज्ञः संमुखः शुक्रो न दोषः शुक्रसंमुखे ॥ संमुखे ज्ञः सिते पृष्ठे दोषहन्ता न को भवेत् ॥ ३३ ॥ पित्रागारे कुचकुसुमयोः संभवो वा यदि स्यात् । पत्युः शुद्धिर्न्न भवति रवेः संमुखो वापि शुक्रः । शस्ते लग्ने गुणवति तिथौ चंद्रतारानुकूले । स्त्रीणां यात्रा भवति सफला सेवितुं स्वामिवेस्म ॥ ३४ ॥ सितमश्वं सितं वस्त्रं हेममौक्तिकसंयुतम् ॥ यत्रा-द्विजातये दद्यात् प्रतिशुक्रप्रशान्तये ॥ ३५ ॥ दैत्यमन्त्री दिवादर्शी उशना भार्गवः कविः ॥ श्वेतोऽथ कुण्डली कायो वीथीमार्गगतस्तथा ॥ ३६ ॥ एतानि भृगुनामानि यः कीर्त्तयति नित्यशः ॥ प्रतिशुक्रो न तस्यास्ति लक्ष्मीमायुश्च विन्दति ॥ ३७ ॥ अथ नवीनशय्याद्यारोहणदिवसमाह ॥ मैत्रेन्दुपौष्णपितृभादितिवाजिचित्रा-हस्तोत्तरात्रयहरीज्यविधातृभानि । एतेषु भेषु शयनासनपादु-कादिसम्भोगकार्य्यमुदितं मुनिभिः शुभाहे ॥ ३८ ॥ अथोद्वर्त्तनादिविचारमाह ॥ उद्वर्त्तनविधानं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च स्त्रियो वा पुरुषस्य वा ॥ दशम्यां च त्रयोदश्यां द्वितीयायां विवर्जयेत् ॥३९॥ अथ वस्त्रप्रक्षालनविचारः ॥
शनिभौमदिने श्राद्धे कुहूषष्ठीनिरंशके ॥ वस्त्राणां क्षारसंयोगो दहत्यासप्तकं कुलम् ॥ ४० ॥ अथ
तैलाभ्यंगविचारः ॥ रवौ गुरौ भृगौ भौमे षष्ठ्यां संक्रान्तिवासरे । चित्रात्वैणवहस्तेषु तैलाभ्यंगं
न कारयेत् ॥ ४१ ॥ अथ तैलाभ्यंगे निषिद्धवाराणां प्रतीकारमाह ॥ रवौ पुष्पं गुरौ दूर्वा भूमिं
भूमिजवासरे ॥ भार्गवे गोमयं दत्वा तैलदोषोपशान्तये ॥४२॥ सार्षपं सघृतं वापि यत्तैलं पुष्पवा-
सितम् अदुष्टं पक्वतैलं च स्नानाभ्यंगे च नित्यशः ॥ ४३ ॥ अथ पुंसां वस्त्रधारणदिवसमाह ॥
ब्रह्मानुराधवसुपुष्यविशाखहस्तचित्रोत्तराश्विपवनादितिरेवतीषु ॥ जन्मर्क्षजीवबुधशुक्रदिनोत्सवा-
दौ धार्यं नवं वसनमोश्वरविप्रतुष्ट्या ॥ ४४ ॥ अथ पुंसां भूषणपरिधानदिवसमाह ॥ बुधगुरु-
सितवारे त्यक्तरिक्तातिथौ च पितृकरवसुचित्रामैत्रपुष्योत्तरेषु ॥ रजतकनकरत्न शंखदन्तप्रवाल-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म् शुभदमिह समस्तं धार्य्यमाणं नराणाम् ॥ ४५ ॥ अथ स्त्रीणां वस्त्रपरिधानदिवसमाह ॥ धनिष्ठा रेवती चैव तथा हस्तादिपंचकम् ॥ अश्विनो गुरुशुक्राभ्यां स्त्रीणां वस्त्रस्य धारणम् ॥ ४६ ॥ अथ सूचीकर्म्मदिवसमाह ॥ चित्रादित्यश्विनीमैत्रश्रविष्ठासु शुभे दिने ॥ सूचीकर्म्मविधानं च शुभं प्रोक्तं मनोषिभिः ॥ ४७ ॥ अथ स्त्रीणां भूषणपरिधानदिवसमाह ॥ नासत्यपौष्णवसुभे करपंचके च मार्त्तण्डभौमगुरुदानवमन्त्रिवारे ॥ लाक्षासुवर्णमणिविद्रुमशंखदन्तरक्तांवराणि विभृयात्प्रमदागणश्च ॥ ४८ ॥ अथ निषिद्धदिवसमाह ॥ प्रजापतेर्भे तिसृषूत्तरासु पुनर्वसोश्च द्वितये न दध्यात् ॥ प्रवालरक्तांवरहेमशंखान् भर्तुर्य्यदोच्छेदवलाऽऽयुरिष्टम् ॥ ४९ ॥ अथाद्यपाकारम्भमैथुनकर्म्मणो दिवसमाह ॥ अष्टम्यामपि संक्रान्तौ तथैव रविवासरे । मत्स्यमांसक्रिया त्याज्या दर्शे मैथुनकर्म्म च ॥ ५० ॥ अथ स्त्रीणां केशवन्धनदिवसमाह ॥ ध्रुवमृदुलघुवर्गे विष्णु–

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलानिलर्क्षे शशिशनिदिनवर्ज्यं गोद्विदेहोदयेषु ॥ उपचयगतपापे केन्द्रकोणे च सौम्ये सुतिथिकरण-
योगे वालवन्धः शुभेन्दौ ॥ * ॥ इति-मैथिल-भानुनाथदैवज्ञविरचिते व्यवहाररत्ने विवाहादिप्र-
करणम् ॥ * ॥ S. S. JHA. ॥ * ॥ रजोमूलः पुत्रो भवति समयाधीनमपि तद्रजस्तस्मात्त-
स्य प्रथितवचनालोकनतया ॥ मयाप्यारब्धेयं समयरचना निन्द्यशुभयोर्यतः पुत्रेणैव प्रभवति सुखं
स्वर्गसदृशम् ॥ १ ॥ यदाद्यं रजोदर्शनं मार्गशीर्षे सवैशाखमासे तथा श्रावणे च । तपस्ये च माघे
भवेदङ्गनानां वरिष्ठं तदन्येषु मासेषु निन्द्यम् ॥ २ ॥ शुक्लपक्षे शुभे वारे सत्तिथौ सत्तनौ दिवा ।
श्रुतित्रये मृदुक्षिप्रध्रुवस्वातौ शुभं स्मृतम् ॥ ३ ॥ अथ प्रथमर्त्तौ परिधानवस्त्रफलम् ॥ शुभगा श्वे-
तवस्त्रा स्याद्रोगिणी रक्तवाससा । नीलवस्त्रधरा नारी बिधवा कुलटापि च ॥ ४ ॥ भोगिनी पीत-
वस्त्रा च शुभगा लोमवस्त्रिणी । आलोहिता भवेद्वन्ध्या ऋतौ वस्त्रफलं स्मृतम् ॥ ५ ॥ अथ वे-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लाफलम् ॥ प्रातः काले रजः स्त्रीणां प्रथमं शोकवर्द्धनम्। मध्याह्ने च धनप्राप्तिरपराह्ने च मध्यमम् ॥ ६ ॥ पूर्वरात्रे सुखावाप्ति-र्म्मध्यरात्रे धनक्षयम्। तथैव परात्रे च प्रथमन्तु फलं स्मृतम् ॥ ७ ॥ संध्ययोरुभयो र्वेश्या दुर्भगा सर्वसंधिषु। तथा भद्रासु निद्रासु ग्रहणे संक्रमेषु च ॥ ८ ॥ अथ शोणितवर्णफलम् ॥ शशशोणितसंकाशेथवालक्तकसन्निभे। पुत्रकन्याप्रसूतिः स्यान्नीले तु स्यान्मृतप्रजा ॥ ९ ॥ शुभगा पुत्रसंयुक्ता शुक्लवर्णे सदार्त्तवे। पीते च स्वैरिणी प्रोक्ता काकवंध्या च पांडरे ॥ १० ॥ अथ स्थानफलम् ॥ गृहमध्ये सुखावाप्तिर्वहिर्द्देशे वियोगिनी। शय्यायां सुखदा भूमावनेकापत्यसन्निधिः ॥ ११ ॥ देवांगणे पुत्रहानिर्गवां स्थानेन्यवेश्मनि। देहल्यां वा पितुर्गेहे निन्दितं प्रथमार्त्तवम् ॥ १२ ॥ अथ स्नानविचारः ॥ रजः पाताच्चतुर्थे स्त्रियाह्नि सुभगया सह। स्नायादवश्यं तिथ्यर्क्षं वारादीन्नावलोकयेत् ॥ १३ ॥ अथ गर्भाधानविचारः ॥ स्त्री-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णामृतुर्भवति षोडशवासराणि तत्रादितः परिहरेच्च निशाश्चतस्रः । युग्मासु रात्रिषु नरा विषमासु नार्य्यः कुर्य्यान्निषेकमथ तास्वपि पर्ववर्ज्ज्यम् ॥ १४ ॥ चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा । पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च ॥ १५ ॥ रेवतीं च मघा मूलं पित्रोः श्राद्धदिनन्तथा ॥ दिवा च परिघाद्यर्द्धं गर्भाधाने परित्यजेत् ॥ १६ ॥ अथ विहितदिनादिविचारः ॥ वासराः पुत्रदा गर्भे कुजार्क्कगुरवो ध्रुवम् । कन्यादौ भृगुशीतांशू क्लीवदौ शनिचन्द्रजौ ॥ १७ ॥ अथ तिथिविचारः ॥ नन्दा भद्रा स्मृता पुंसि स्त्रीषु पूर्णा जया स्मृता ॥ रिक्ता नपुंसके ज्ञेया तस्मात्तां परिवर्जयेत् ॥ १८ ॥ अथ नक्षत्रविचारः ॥ पुष्यार्कचन्द्रशिवमूलपुनर्वसूनि आषाढयुग्महरिभाद्रपदद्वयं च ॥ एतानि पुंसि कथितानि शुभानि भानि अन्येषु गर्भपतनादिभयानि भेषु ॥ १९ ॥ अथ पुंसवनम् ॥ मासे द्वितीयेप्यथ वा तृतीये पुन्नामधेये ग्रहऋक्षचक्रे ॥ अक्षीणचन्द्रे कुज-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भानुजीवे वारे शुभं पुंसवनादि कर्म्म ॥ २० ॥ अथ सीमन्तकर्म्म ॥ मासेशे प्रबले शुभेक्षितविधौ मासेथ षष्ठेष्टमे मैत्रे पुंसवनोदितर्क्षसहिते रिक्ताविहीनेतिथौ । सीमन्तोन्नयने मृगाजरहिते लग्ने नवांशोदये योज्यं पुंसवनोदितं यदपरं तत्सर्वमत्रापि च ॥ २१ ॥ अथ गर्भाधानसमयात्प्रतिमासं मासाधिपकथनपूर्वक-गर्भस्थस्यावयवलक्षणमाह ॥ आद्यस्य मासस्य भृगुर्विनेता तस्मिन् भवेच्छोणितशुक्रयोगः । तद्रूपनेष्टावलहानिदीप्त्या गर्भस्य वाच्यं सकलं जनन्याम् ॥ २२ ॥ द्वितीयमासाधिपतिः कुजश्च तस्मिन् घनं तस्य भवेत्समन्तात् । जीवस्तृतीयस्य करांघ्रिवक्त्रग्रीवादिकं तत्र भवेत्समग्रम् ॥ २३ ॥ सूर्यश्चतुर्थस्य पतिः प्रतिष्ठो ह्यस्थीनि तत्र प्रभवन्ति पुंसाम् ॥ मज्जा च मेदश्च समांसरक्तं व्यक्तिस्समायाति विभागतश्च ॥ २४ ॥ तस्मिन्त्स सौरिः किल पंचमस्य पतिः समत्वक्कृतिमातनोति ॥ प्राप्नोति पुष्टिं विविधां च गर्भे व्यक्तं समागच्छति कायजातम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

॥ २५ ॥ षष्ठस्य चन्द्रो विभुतामुपैति रोमाणि तत्र प्रभवन्ति गात्रे ॥ रदाश्च जिह्वा प्रहरप्रभावे गुह्यं
सरन्ध्रं प्रभवेच्च तस्मिन् ॥२६॥ स्याच्चन्द्रसूनुः किल सप्तमस्य तस्मिन् स्मृतिःस्यात्सततं नराणाम् ॥
पंचेन्द्रियत्वं च विवेकता च कोहं कुतोत्राश्रयमभ्युपेतः ॥ २७ ॥ लग्नाधिनाथस्त्वथ चाष्टमस्य मासस्य
तस्मिन् प्रभुरावुभुक्षा । भवेन्मनुष्यस्य ततः सुतृप्तिर्भक्ते जनन्या रसभावसंगात् ॥ २८ ॥ नक्ष-
त्रनाथो नवमस्य नाथस्तस्मिन्विरक्तिर्विविधा नराणाम् । गर्भाश्रयाद्दुःखमनन्तमेकं कृतं स्मृतं पूर्व-
शुभाशुभस्य ॥ २९ ॥ दिवाकरस्तद्दशमाधिनाथस्तस्मिन् प्रतिष्ठः प्रभवो नराणाम् । तस्मिन् यदा
स्याद्व्ययगः शशांकस्त्वाधानलग्नाज्जननन्तदैव ॥ ३० ॥ अथ सूतिकागृहनिर्म्माणप्रवेशकावाह ।
प्रसवार्थं गृहं कुर्य्याददित्यां शुभवासरे । रोहिण्यां श्रवणायां च प्रवेशस्तत्र कीर्त्तितः ॥ ३१ ॥
अथ प्रसूतीस्नानदिवसमाह ॥ मैत्राश्विध्रुवहस्तेषु स्वात्यां पौष्णाभिधेपि च । कुजार्क्कैज्यदिनेष्वेव



For Private and Personal Use Only

सूतीस्नानं शुभं स्मृतम् ॥ ३२ ॥ मिश्राद्रात्रितये मूले तक्षश्रुतिमघान्तके । वसुषड्विरिक्तायां सूतीस्नानं विवर्जयेत् ॥ ३३ ॥ अथ शिशोर्म्मातुः स्तनपानदिवसमाह । रिक्ताभौमं परित्यज्य विष्टिं पातं सवैधृतिम् ॥ मृदुध्रुवक्षिप्रभेषु स्तनपानं हितं शिशोः ॥ ३४ ॥ अथ मासपूर्त्तौ सूती-जलपूजनदिवसमाह । नन्दासु पूर्णासु जयाज्ञचन्द्रजीवे च हस्ते श्रवणे मृगे च ॥ दितिद्वये स्त्री-जलपूजनं च कुर्य्याच्छिशूनां चिरजीवनाय ॥ ३५ ॥ अथ शिशूनां पालनाशयनदिवसमाह ॥ जीवेन्दुशुक्रे शशिपुष्यपौष्णध्रुवेषु पौष्णत्रितये करे च । दित्यश्वभे पक्षसितेतरे च स्यात्पालनायां शयनं शिशोः सत् ॥ ३६ ॥ अथ शिशोर्न्नामकरणमाह । ध्रुवमृदुचरवर्गे वाजिहस्तासमेते क्ष-यमुदयमथैषां सत्सुकेन्द्रस्थितेषु ॥ रविशिवमितवारे तत्कुलाचारतो वा शुभदिनतिथियोगे नामकुर्य्यात्प्रशस्तम् ॥ ३७ ॥ शर्म्मान्तं ब्राह्मणस्योक्तं वर्म्मान्तं क्षत्रियस्य च ॥ गुप्तदासान्त-

कन्नाम प्रशस्तं वैश्यशूद्रयोः ॥ ३८ ॥ देव्यन्तं द्विजकन्यानां शूद्रायां न विधिः स्मृतः ॥ नामंग-
ल्यं च तत्रापि नाम कुर्य्याद्विचक्षणः ॥ ३९ ॥ ओजाक्षरं सदा स्त्रीणां पुरुषस्य समाक्षरम् ।
दीर्घमक्षरमस्पष्टं यत्नतो वर्जयेत्सुधीः ॥ ४० ॥ अथ दोलाद्यारोहणम् ॥ दोलारोहेर्कभात्पंचशर-
पञ्चेषु सप्तभैः ॥ नैरुज्यं मरणं कार्श्यं व्याधिः सौख्यं क्रमाच्छिशोः ॥ ४१ ॥ धृतिभूपार्कदिग्द-
न्तप्रमिते शुभवासरे । मृदुक्षिप्रध्रुवर्क्षेषु दोलारूढिः शुभा स्मृता ॥ ४२ ॥ अथ ताम्बूलदानदि-
वसमाह ॥ चरध्रुवमृदुक्षिप्रसद्वारेसत्तिथौ सुधीः । सार्द्धमासद्वये दद्यात्ताम्बूलं प्रथमं शिशोः
॥ ४३ ॥ अथ गृहान्निःक्रमणदिवसमाह ॥ गमोक्तसमये कुर्य्याच्छिशोर्निःक्रमणं गृहात् ॥ च-
तुर्थे मासि सूर्य्यार्घैर्द्वादशाहे पि जन्मतः ॥ ४४ ॥ अथ शिशूनां भूम्युपवेशनम् ॥ पृथ्वीं वराहं
विधिवत्प्रपूज्य शुद्धे कुजे पंचममासि बालम् । क्षिप्रध्रुवे सत्तिथिवासराद्ये निवेशयेत्कौ कटिसूत्रव-



For Private and Personal Use Only

न्द्धम् ॥ ४५ ॥ अथान्नप्राशनम् ॥ षष्ठादियुग्ममासेषु शिशूनामन्नभोजनम् ॥ कन्यानां पंचमान्मासादयुग्मे भोजनम् हितम् ॥ ४६ ॥ द्वितीया च तृतीया च पंचमी दशमी तथा । त्रयोदशी शिशोरन्नप्राशनेतिशुभा स्मृता ॥ ४७ ॥ शनिभौमदिनं त्यक्त्वा मृदुक्षिप्रचरध्रुवे । गोकन्यायुग्ममीनांशे शिशुरद्यात्सिते दले ॥ ४८ ॥ अथ शिशोराद्यक्षौरमाह ॥ सुरासुरगुरोः शुद्धिर्वेदोवतप्रक्रियापि च शिशूनां प्रथमक्षौरे चिन्तनीया न कुत्रचित् ॥ ४९ ॥ तृतीयाद्विषमे वर्षे त्यक्तचैत्रोत्तरायणे । सत्तिथौ शुभवारे च क्षौरमाद्यं हितं शिशोः ॥ ५० ॥ शाक्रोपेते विमैत्रे च मृदुक्षिप्रचरर्क्षके । क्षौरमाद्यं शिशूनां सज्जन्ममासादिकं विना ॥ ५१ ॥ अथ नित्यक्षौरविधिः ॥ क्षौरं भार्गववासरे शुभकरं वारेथ जीवस्य च कर्त्तव्यं बुधसोमयोरतिशयं भूतातिरिक्ततिथौ । भुक्ताभ्यक्तनिरासनैश्च समरग्रामान्तरप्रस्थितैः ॥ स्नातैर्न्नो नवमेहनीति विबुधाः संध्योर्न्निशायां जगुः ॥ ५२ ॥

अथाद्यश्मश्रुकर्म्म ॥ षष्ठ्यष्टमीश्चतुर्थीं च सिनीवालीं चतुर्दशीम् ॥ नवमीं चार्कमन्दारान् श्मश्रुकर्म्मणि वर्जयेत् ॥ ५३ ॥ अथ कर्णवेधः ॥ नो जन्मेन्दुभमाससूर्य्यरविजक्ष्माजाहयाम्यायने शस्तेर्के लघुविष्णुयुग्ममृदुभस्वात्युत्तरादित्यभैः । सौम्यैस्त्र्यायत्रिकोणकण्टकगतैः पापैस्त्रिलाभारिगैरोजाब्दे श्रुतिवेध इज्यसितभे लग्ने तु काले शुभे ॥ ५४ ॥ अथाक्षर-विद्यारम्भो यथाक्रम् ॥ शिवार्कदिग्द्विषट्शरत्रिके लघुश्रवो निलान्त्यभादितोशतक्षमित्रभे शिशोर्ह्लिपिग्रहः ॥ सुमेषकर्कसत्तुलैणहीनसत्तनौ रवावुदग्गविष्णुगोरमास्समच्र्च्य पञ्चमाब्दके ॥ ५५ ॥ शुभे दिने शिवार्कदिग्द्विके तिथौ शुभैरधीतिरुत्तमा त्रिकोणकेन्द्रगैर्ध्रुवान्त्यमित्रभे ॥ गुरुद्वयेर्क्कजीवविद्सितेऽह्नि षट्शरत्रिकेश्विमूलपूर्विकात्रये मृगात्कराच्छ्रुतेस्त्रये ॥ ५६ ॥ अथोपनयनदिवसमाह ॥ चौलादिकं तु यत्कर्म्म युगपन्मैथिलेषु च । तत्रोपनयनं श्रेष्ठं तस्मात्तत्प्रक्रियोच्यते ॥ ५७ ॥

गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम् । राज्ञामेकादशे मौञ्जीबन्धनं द्वादशे विशः ॥ ५८ ॥ अथ
आत्ययकालविचारः ॥ आषोडशाब्दि विप्रस्य सावित्रीपतनं भवेत् । द्वाविंशतेस्तथा राज्ञश्च तुर्विंशतितो
५.९.११२७ १९.८.४
विशः ॥ ५९ ॥ अथ गुरुशुद्धिः ॥ श्रेष्ठो गुरुस्त्रिकोणायद्विसप्तस्थानसंस्थितः । ऋष्फाष्टतुर्य्यगं
हित्वा मध्यमोन्येषु वेश्मसु ॥ ६० ॥ आद्ये तृतीयभवने रिपुरंध्रयोर्वा दुःखं करोति नियतं विपदं च
जीवः । अन्त्यं चतुर्थदशमं प्रवदन्ति मध्यं क्षेमं करोति नियतं परिशेषराशौ ॥ ६१ ॥ अथानि-
ष्टगुरुप्रतीकारमाह ॥ स्वोच्चे स्वभे स्वमैत्रे वा स्वांशे वर्गोत्तमे गुरुः । ऋष्फाष्टतुर्य्यगोपीष्टो नीचा-
रिस्थः शुभोप्यसन् ॥ ६२ ॥ अथ रविशुद्धिविचारः ॥ श्रेष्ठोरविस्त्रिदशलाभविपक्षसंस्थो मध्यो
द्विपंचमगतो नवमे तथैव । जन्माष्टसप्तहिबुकान्त्यविनाशकारी सद्भिस्त्रिधा निगदिता रविशुद्धि-
रेषा ॥ ६३ ॥ अथ मासशुद्धिः ॥ नक्रादिकं समारभ्य यावत्त्र्यंशः शनेरपि । तावदेवोपनी-

तिः स्याद्दटूनामिति कीर्त्तिता ॥ ६४ ॥ मार्गे मासि तथा ज्येष्ठे क्षौरं परिणयं व्रतम् । ज्येष्ठपुत्रदुहि-
त्रोश्च यत्नतः परिवर्ज्जयेत् ॥ ६५ ॥ आवश्यकेऽपि कर्त्तव्ये व्रतोद्वाहादिकर्म्मणि ॥ कृत्तिकास्थं रविं
त्यक्त्वा ज्येष्ठे ज्येष्ठस्य कारयेत् ॥ ६६ ॥ जन्मोदये जन्मसु तारकासु मासेऽपि वा जन्मनि जन्मभे
वा । व्रतेपि विप्रः श्रवणं विनापि प्रज्ञाविशेषैः प्रथितः पृथिव्याम्॥६७॥ जन्ममासादिकं त्याज्यं सर्वथा
यत्नतो बुधैः । ज्येष्ठपुत्रदुहित्रोश्च व्रतोद्वाहादिकर्म्मसु ॥ ६९ ॥ जन्ममासनिषेधे तु दिनानि
दश वर्ज्जयेत् । आरभ्य जन्मदिवसाच्छुभाः स्युस्तिथयोऽपराः । अथोपनयने चैत्रप्रशंसा । गोचराष्ट-
कवर्गाद्यैर्यदि शुद्धिर्न्न लभ्यते । तदोपनयनं कार्य्यं चैत्रे मीनगते रवौ ॥ ७० ॥ अथ शाखा-
धिपबलम् । शाखाधिपतिवारश्च शाखाधिपबलं शिशोः । शाखाधिपतिलग्नं च दुर्लभं त्रितयं
व्रजेत् ॥ ७१ ॥ ऋग्वेदाधिपतिर्ज्जीवो यजुर्वेदाधिपः सितः । सामवेदाधिपो भौमः शशिजोथर्ववेद-



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

राद् ॥ ७२ ॥ यथा शाखाधिपस्यात्र वलं प्रोक्तं विचक्षणैः ॥ तथा वर्णाधिपस्यापि व्रतबन्धे विचारयेत् ॥ ७३ ॥ सुरासुरगुरू विप्रौ, क्षत्रियौ रविभूमिजौ ॥ वैश्यश्चन्द्रो, बुधः शूद्रः, प्राऽन्त्यजातिः शनैश्चरः ॥ ७४ ॥ अथ तिथिशुद्धिः ॥ द्वितीयायां तृतीयायां पंचम्यां दशमीत्रये ॥ शनिभौमदिनं त्यक्त्वा मौंजीबन्धः शुभो भवेत् ॥ ७५ ॥ अथ नक्षत्रशुद्धिः ॥ तीक्ष्णध्रुवमृदुक्षिप्रत्रिपूर्वा सदितिं विना ॥ चरर्क्षेपि प्रशस्ता स्यादुपनीतिर्वटोः किल ॥ ७६ ॥ अथ तत्कालिकानध्यायाः ॥ न रात्रौ न च संध्यायां नानध्याये न भिन्नभे ॥ न कृष्णे नापराह्णे च नाशौचे न गलग्रहे ॥ ७७ ॥ नोपरागे न भद्रायां न प्रदोषादिसंयुते ॥ नाकालवर्षणे चैव गर्जिते नोपनायनम् ॥ ७८ ॥ अथ गलग्रहलक्षणम् ॥ अष्टमो सप्तमोविद्धा, त्रयोदश्या चतुर्दशी । द्वितीया प्रतिपद्विद्धा, गलग्रह उदाहृतः ॥ ७९ ॥ अथ प्रदोषलक्षणम् ॥ चतुर्थी प्रथमे यामे, सार्द्धयामे च सप्तमी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रयोदश्यर्द्धरात्रे च प्रदोषः सर्वघातकः ॥ ८० ॥ अथाकालवृष्टिलक्षणम् ॥ पौषादिचतुरोमासान् ज्ञेया वृष्टिरकालजा। व्रताह्नि पूर्वसंध्यायां गर्जितस्यापि दूषणम् ॥ ८१ ॥ अथ लग्नशुद्धिः ॥ गुरुशशिभृगुपुत्रे केन्द्रसंस्थे त्रिकोणे। रिपुसहजगृहाये सूर्य्यमाहेयमन्दे। वृषतुरगतुलायां सिंहमीने प्रशस्तं व्रतकरणमिहोक्तं वाष्टमस्थे शशांके ॥ ८२ ॥ अथ विद्यारम्भः ॥ कठिन्युदितदेवांश्च स्वविद्यां सूत्रकारकम्। शिवं नवग्रहांश्चैव पूजयित्वा विधानतः ॥ ८३ ॥ गुरुः पूर्वमुखः शिष्यं पश्चिमास्यं च पाठयेत् ॥ नक्षत्रतिथिवाराद्यैः सर्वैः कठिनिकोदितैः ॥ ८४ ॥ धरण्यामृतुमत्यां च भूमिकम्पे तथैव च। अन्तरागमने चैव विद्यान्नैव पठेन्नरः ॥ ८५ ॥ अथ धनुर्विद्यारम्भः। मघोत्तरापावकविष्णुचित्रास्वात्यश्विजीवादितिमूलहस्ताः। वाराः सितार्केज्यमहीसुतानामुक्ता धनुर्वेदविधौ प्रशस्ताः ॥ ८६ ॥ अथ छूरिकाबन्धनम् ॥ विचैत्रव्रतमासादौ विभौ-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मास्ते विभूमिजे। छूरिकाबन्धनं शस्तं नृपाणां प्राग्विवाहतः ॥ ८७ ॥ अथ राज्ञाभिषेकः ॥ मैत्रशाक्रकरपुष्यरोहिणी-वैष्णवाद्यतिसृषूत्तरासु च । रेवतीमृगशिरोऽश्विनोष्वपि क्ष्माभुजां समभिषेक इष्यते ॥ ८८ ॥ विलग्नजन्मेशदशाधिनाथमार्त्तण्डधात्रीतनयैर्बलिष्ठैः ॥ गुर्विन्दुशुक्रैः स्फुरदंशुजालैर्म्महीपतीनामभिषेक इष्टः ॥ ८९ ॥ तारकाशशभृतोर्बले दिने सद्ग्रहस्य च तिथावरिक्तके। जन्मभादुपचये स्थिरोदये भूभुजां समभिषेक इष्यते ॥ ९० ॥ * ॥ इति श्रीभानुनाथदैवज्ञविरचिते व्यवहाररत्ने संस्कारप्रकरणम् ॥ S. S. J. ॥ ॥ ५ ॥ यः पण्डितो भवति तस्य विदेशयात्रा पात्राज्ञया समुचितार्य्यधनार्ज्जनाय । तस्माद्वयं निखिलशास्त्रविचारदक्षा रक्षासु लक्षितगमस्य दिनं वदामः ॥ १ ॥ अथ मासशुद्धिः ॥ मेषे धनुषि सिंहे च यात्रा सौख्यप्रदायिनो। रवौ कर्कालिमीनस्थे दुःखदान्येषु मध्यमा ॥ २ ॥ अथ तिथिशुद्धिः ॥ सिता-

For Private and Personal Use Only

थ्या द्वादशी षष्ठी सिनीवाली च पूर्णिमा । रिक्ताष्टमी परित्याज्या यात्रायां सर्वथा बुधैः ॥ ३ ॥ अथ नक्षत्रशुद्धिः ॥ हस्तेन्दुमित्रश्रवणाश्विपुष्यपौष्णश्रविष्ठाश्च पुनर्वसू च ॥ श्रेष्ठानि चिष्णानि नव प्रयाणे त्यक्त्वातिपंचात्तिससप्ततारा: ॥ ४ ॥ अजो विशाखः पवनः कृशानुः स्थाणुः कृतान्तः फणिभृन्मघा च । यात्रास्वनिष्टान्यपराणि भानि स्मृतानि नेष्टानि न निन्दितानि ॥ ५ ॥ शाक्रे च सौरिचन्द्राह्ने नैव पूर्वां दिशं व्रजेत् ॥ गुरौ च पूर्वभाद्रे च दक्षिणस्यान्तथैव च ॥ ६ ॥ रोहिण्यां सूर्य्यशुक्राह्ने न प्रतीचीमियान्नरः । कुजे बुधेर्य्यमर्क्षे च सौम्याशां च तथैव च ॥ ७ ॥ अथ वारशुद्धिः ॥ रवौ शुक्रे व्रजेत् प्राचीमवाचीं च महीसुते । प्रतीचीं शनिचन्द्राह्ने तथोदीचीं गुरोर्दिने ॥ ८ ॥ यद्दिनेषु व्रजेत्प्राचीमग्निकोणेपि तद्दिने । प्राग्दक्षिणक्रमेणैवं सर्वं ज्ञेयं मनीषिभिः ॥ ९ ॥ क्षिप्रानुराधया चैव गच्छेत्सर्वदिशास्वपि ॥ विलोक्य चन्द्रतारादेर्बल माशापते-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रपि ॥ १० ॥ अथानन्दादि-योगविचारः ॥ आनन्दः कालदण्डश्च धूम्रो धाता तथैव च ॥
सौम्यो ध्वांक्षश्च केतुश्च श्रीवत्साख्यस्ततः परम् ॥ ११ ॥ वज्रकं मुद्गरश्छत्रं मित्रं मानसमेवच ।
पद्मलुम्बोत्पातमृत्युकाणसिद्धिशुभाभिधाः ॥ १२ ॥ सुधामुशलरोगाख्या मातंगो राक्षसश्चरः ॥
स्थिरः प्रवर्द्धमानः स्यात्सप्तविंशतिरित्यपि ॥ १३ ॥ अथैषामानयनमाह ॥ दास्राद्रवौ मृगाच्चन्द्रे
कुजे सार्पात्करादबुधे ॥ गुरौ मैत्राद्भृगौ वैश्वान्मन्दे गण्याश्च वारुणात् ॥ १४ ॥ एते योगाः
फलं दद्युः स्वस्वनामानुसारतः ॥ यात्रायामेव नान्यत्र ज्ञेयमित्यार्य्यबुद्धिभिः ॥ १५ ॥ ध्रुवै-
र्म्मिश्रैर्न्न पूर्वाह्णे मध्याह्ने न च दारुणैः ॥ नापराह्णे व्रजेत् क्षिप्रैर्म्मृदुभैर्न्न निशामुखे ॥ १६ ॥
उग्रार्ग्रैर्म्मध्यरात्रे च चराख्यैर्न्न निशान्तके ॥ हस्तश्रुतिमृगेज्यर्क्षैः सर्वकाले शुभोगमः ॥ १७ ॥
राशिभेदेन दिक्षु चन्द्रावस्थितिमाह ॥ मेषे सिंहे च कोदण्डे पुर्वस्यां दिशि चन्द्रमाः । वृषे नक्रे च

For Private and Personal Use Only

कन्यायां दक्षिणस्यां तथैव च ॥ १८ ॥ युग्मे कुम्भे तुलायां च पश्चिमेषु व्यवस्थितः ॥ कर्कवृश्चिकमीनेषु संस्थितश्चोत्तरास्वलम् ॥ १९ ॥ संमुखे दक्षिणे चन्द्रः सर्वसिद्धिप्रदायकः ॥ पृष्ठे वामे निषिद्धः स्यादिति प्राह मुनीश्वरः ॥ २० ॥ प्रागादितस्तनौ सूर्य्ये भार्गवे व्ययलाभयोः । कर्म्मस्थे धरणीपुत्रे राहौ धर्म्माष्टसंयुते ॥ २१ ॥ शनौ द्यूने विधौ वारिपंचमस्थे बुधेम्बुगे ॥ गीष्पतौ भ्रातृवित्तस्थे लालाटीति प्रकीर्त्तिता ॥ २२ ॥ अस्यां लालाटिकायां च यात्रा त्याज्या सदैव हि ॥ कुम्भकुम्भांशका वापि मीनलग्ने तथैव च ॥ २३ ॥ अथ योगिनीविचारस्तत्र प्रथमं तिथियोगिनोमाह ॥ पूर्वस्यामुदयेद्ब्राह्मी प्रथमे नवमी तिथौ ॥ माहेशो चोत्तरस्यान्तु द्वितीयादशमातिथौ ॥२४॥ एकादश्यां तृतीयायां कौमारी वह्निकोणगा ॥ चतुर्थीद्वादशीष्वेव वैष्णवो नैऋतिस्थिता ॥ २५ ॥ पंचम्यां च त्रयोदश्यां वाराही दक्षिणे स्मृता ॥ षष्ठ्यां तिथौ चतुर्दश्यामिन्द्राणी पश्चिमे स्थि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ता ॥ २६ ॥ पौर्णमास्यान्तु सप्तम्यामुत्तरे चण्डिकोदयः । अष्टम्यां न॰ष्टचन्द्रे च महालक्ष्मीः शिवालये ॥ २७ ॥ योगिनी सुखदा वामे पृष्ठे वांछितदायिनी । दक्षिणे कार्य्यनाशाय संमुखे निधनप्रदा ॥ २८ ॥ प्रागुत्तराग्निनैर्ऋत्ययमपश्चिमवायुषु ॥ रथ्यादिषु च वारेषु वर्जयेद्वारयोगिनीम् ॥ २९ ॥ यत्रोदयगता देवी तनो यामार्द्धभुक्तिगा । भ्रमन्ती तेन मार्गेण भवेत्तत्कालयोगिनी ॥ ३० ॥ अथ राहुविचारः ॥ तत्र प्रथमं मासविचारः ॥ पूर्व्वादिदिक्षु मार्गाद्यै-स्त्रिभिस्त्रिभिरिति क्रमात् ॥ मासकालस्सविज्ञेयो यात्रायां संमुखं त्यजेत् ॥ ३१ ॥ नन्दायां पश्चिमे पूर्वे भद्रायां वह्निमारुते । जायायामुत्तरे याम्ये रिक्तास्वीशाननैर्ऋते ॥ ३२ ॥ पूर्णायखे तिथेः कालं वर्जयेत्संमुखं सुधीः ॥ शुक्ले पूर्वादिचत्वारि कृष्णे पश्चिमतश्च तत् ॥ ३३ ॥ अथ वारराहुविचारः ॥ आदित्ये चोत्तरे कालः सोमे वायव्य एव च ॥ भौमे च पश्चिमे सौम्ये नैर्ऋ-

For Private and Personal Use Only

ठय० त्ये च गुरौ यमे ॥ ३४ ॥ आग्नेय्यां भृगुजे ज्ञेयः शनौ पूर्वे क्रमाद्भवेत् ॥ वारराहुः सदा त्या- १०
॥२९॥ ज्यः प्रवेशे वामसंमुखः ॥ ३५ ॥ अथ यामार्द्धराहुविचारः ॥ इन्द्रवासवभे रुद्रे तोयेग्न्युत्तरराक्षसे-
यामार्द्धमुदितो राहुर्भ्रमत्येवं दिगष्टके ॥ ३६ ॥ रात्रावसौ प्रतीच्योतो भ्रमत्येवं न संशयः ॥ दक्षे
पृष्ठे शुभो ज्ञेयो यात्रायां युद्धवादयोः ॥ ३७ ॥ अथ राहुयुक्तयोगिनी-बलप्रशंसामाह ॥ पृष्ठे दक्षे
योगिनो राहुयुक्ता यस्यैकोयं शत्रुलक्षं निहन्ति ॥ श्रेष्ठं सर्वेभ्यो बलेभ्यस्तदेतत्संक्षेपोयं सर्वसारो-
भ्यधासि ॥ ३८ ॥ अथ ग्रहयोगेन यात्राविचारः ॥ यथा हि योगाद्ध्यमृतायते विषं विषायते
मध्वपि सर्प्पिषा समम् । तथा विहाय स्वफलानि खेचराः फलं प्रयच्छन्ति हि योगसंभवम् ॥ ३९ ॥
महीभृतां योगवशात्फलोदयो, द्विजन्मनामृक्षगुणैश्च जायते ॥ सततस्करादेः शकुनप्रभावतो, जनस्य-
१४७।० ५९
शेषस्य मुहूर्त्तशक्तितः ॥ ४० ॥ केन्द्र-त्रिकोणगाः सौम्या यात्रायां शुभदायकाः त्रिषडा''येषु ॥२९॥

संस्थाश्च पापा अपि निसर्गतः ॥ ४१ ॥ जीवशुक्रबुधेष्वेको यदि केन्द्रत्रिकोणगः ॥ यात्रा प्रशस्ता विज्ञेया द्वौ त्रय स्तर्हि का कथा ॥ ४२ ॥ लग्नेर्के सप्तमे चन्द्रे वित्ते सौम्ये प्रयाति यः ॥ लब्ध्वा सर्वाभिलाषं च शीघ्रमायाति मन्दिरे ॥ ४३ ॥ लग्नेशः शुभयुक्दृष्ट श्चन्द्रश्चोपचयस्थितः ॥ नैधने भवने शुद्धे प्रयाणे शुभदायकाः ॥ ४४ ॥ लग्ने जीवो मूर्तौ चन्द्रः शत्रुगोर्को यदा भवेत् तदा यात्रा प्रशस्ता स्यादिति होराविदो मतम् ॥ ४५ ॥ वर्गोत्तमे यदा चन्द्रः सौरिर्हिबुकव्ययसंस्थितः ॥ शत्रुगश्च महीपुत्रः प्रयाणे शुभदायकः ॥ ४६ ॥ जन्मराशिस्तनुर्वापि यदि लग्नगतो भवेत् ॥ ययोरधीशौ वा लग्ने यात्रा सिद्धिप्रदा स्मृता ॥ ४७ ॥ जन्मराशेर्जन्मलग्नादष्टमस्थो यदा तनुः ॥ तदा यात्रा न कर्त्तव्या जन्मतिथ्यादिकेपि च ॥ ४८ ॥ शुभो वाप्यशुभो वापि लग्नादष्टमगो यदि ॥ तदा यात्रा निषिद्धैव यद्यन्योपि गुणो भवेत् ॥ ५९ ॥ अथ यात्रायां व्यवस्था-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

माह ॥ गेहाद्गेहान्तरे यात्रा सीम्नः सीमान्तरेपि च ॥ ५० ॥ वाणविक्षेपमात्रे वा पूर्वाचार्य्यै-
रुदाहृता ॥ क्षौरं प्राक् त्रिदिनं त्याज्यं क्षौरं पंचदिनन्तथा ॥ प्रयाणदिवसे तद्वत्तैलं क्षौद्रं रति-
र्वमिः ॥ ५१ ॥ नैकत्र तिष्ठेद्दशरात्रमीशः, सामन्तसंज्ञो न च सप्तरात्रम् । तदन्यलोको न च
पंचरात्रं गौणप्रयाणेपि च रीतिरेषा ॥ ५२ ॥ अशक्यकार्य्येण यदा विलम्बः प्रयाणकाले मनसस्त्व-
भीष्टम् ॥ प्रचालयेद्देवगृहादवश्यं गन्तव्यकाष्ठापरवेश्ममध्ये ॥ ५३ ॥ निमित्ताराशिरेकतो नृणां
मनस्तदेकतः । अतो यियासतां बुधैर्मनोविशुद्धिरिष्यते ॥ ५४ ॥ अथ शकुनाः ॥ विप्रोगज-
स्तुरंगश्च फलमन्नं घृतं दधि ॥ दुग्धं नवीनवस्त्रं च पुष्पं वाद्यं ध्वजं मधु ॥ ५५ ॥ आदर्शो-
ष्णीषरत्नानि दीप्तवैश्वानरोपि च ॥ ससुतस्त्री च वेश्या च छत्रं सद्वाक्यमेव च ॥ ५६ ॥ सधौ-
तवस्त्रोरजकः पूर्णः कलश एव च ॥ मेलेक्षुदण्डमृच्छागमद्यमीनास्त्वकन्यकाः ॥ ५७ ॥ गावो



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मयूराश्वाषश्च शवं क्रन्दनवर्जितम् ॥ नृयानं वेदगानं च गीतं मंगलकर्म्मजम् ॥ ५८ ॥ अंकुशो
नकुलामांसं वृषभः शुक्लविग्रहः ॥ प्रयाणे शुभदा एते तथा सिंहासनं खलु ॥५९॥ अथापशकुनाः ॥
वन्ध्यास्थितुषचर्म्माणि सर्प्पांगारेन्धनानि च ॥ वसात्रोपुष्पतैलाश्च लवणोन्मत्तदण्डिनः ॥ ६० ॥
जटिलाभ्यक्तनग्नाश्च गुडतक्रतृणानि च ॥ विमुक्तकेशः पतितो व्यंगो विष्ठा विमृत्तिका ॥ ६१ ॥
कार्प्पासवमनव्याधियुक्तान्धवधिरादयः ॥ स्वगेहदहनं छिक्का वस्त्रादिस्खलनन्तथा ॥ ६२ ॥ कृ-
ष्णधान्यादि वस्त्रं च गर्भिणी क्रन्दनादिकम् ॥ पतितो दुर्वचः कुब्जः क्षुधार्त्तः शरटापि च ॥ ६३ ॥
मार्ज्जारसमरक्लीव-लुलायखरादयः ॥ सर्वे प्रयाणप्रारंभे दर्शनैर्भयदाः स्मृताः ॥ ६४ ॥ गर्द-
भस्य रवा ऋक्षो वानरः कोकिलोपि च ॥ स्त्रीसंज्ञकाश्च याः काश्चिद्दक्षिणे ताः शुभावहाः ॥६५॥ छु-
छूका सूकरी पल्ली कोकिलस्त्री कपोतकी ॥ शिवा पुंसंज्ञका चैव वामांगे शुभदायकाः ॥६६॥ आद्ये-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 पशकुने स्थित्वा प्राणानेकादशं व्रजेत् ॥ द्वितीये षोडशप्राणान् तृतीये न क्वचिद्व्रजेत् ॥ ६७ ॥ 
 आदौ संपूज्य दैवज्ञं गृहदेवीं प्रणम्य च ॥ ध्यात्वा दिगीशं सद्वाक्यैः सोष्णीषः प्रव्रजेन्नरः ॥ ६८ ॥
अथ नौकायानमाह ॥ द्वितीया च तृतीया च पंचमी च त्रयोदशी ॥ सप्तमी दशमी पोतप्रयाणे
सौम्यवासराः ॥ ६९ ॥ उत्तरावारुणस्वातीपैत्र्ये कालविलम्बना ॥ विशाखाकृत्तिकाज्यैष्ठाब्रा-
ह्म्यमूलेऽग्नितो भयम् ॥७०॥ पूर्वात्वाष्ट्रे न लाभः स्याद्यमादर्द्रा सर्वभंगकृत् ॥ विचार्य्यैवं च कर्त्तव्या
पोतयात्रा न संशयः ॥ ७१ ॥ अथ नृपदर्शनमाह ॥ मृदुक्षिप्रध्रुवर्क्षैस्तु शनिभौमदिनं विना ॥
विपर्वारिक्ततिथ्यादौ नृपदर्शनमुत्तमम् ॥ ७२ ॥ अथ परदेशगः कदा समागमिष्यतीति प्रश्नोत्तर-
माह ॥ विलग्नचन्द्रान्तरभागनिघ्नं यातावलग्नं खगुणैर्विभक्तम् ॥ आयाति राजा किल लब्ध-
मासैर्गतो विदेशाच्छतयोजनस्थः ॥ ७३ ॥ ॥ * ॥ इति श्री भानुनाथदैवज्ञविरचिते व्यवहारर- 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ते यात्राप्रकरणम् ॥ ६ ॥ ॥ * ॥ S. S. JHÁ. ॥ * ॥ विदेशगस्य लोकस्य स्वगृहागमनादिषु ॥ प्रयाणोक्तैः प्रयाणः स्यात्प्रवेशोक्तैः प्रवेशकः ॥ १ ॥ अथ पुष्करण्यादि-खननदिवसमाह ॥ वैशाखे श्रावणे माघे फाल्गुने मार्गकार्त्तिके ॥ पौषे ज्यैष्ठे भवेत्सिद्ध्यै वाप्याः कूपतडागयोः ॥ २ ॥ अथ तिथिविचारः ॥ एकादशी द्वीतोया च तृतोया पंच सप्तमो ॥ प्रतिपद्दशमी श्रेष्ठा पूर्णिमा च त्रयोदशो ॥ ३ ॥ एतास्सितदलस्यैव भार्गवेन्द्विज्यवासरे ॥ दशमस्थे भृगोः पुत्रे जलखातः प्रशस्यते ॥ ४ ॥ मृदुध्रुवक्षिप्रचरेषु लग्ने झषे घटे वा मकराभिधे च ॥ आप्पे विधौ सर्वजलाशयानां सदा समारंभमुसन्ति सन्तः ॥ अथ देवताघट्टनमुहूर्त्तमाह ॥ ध्रुव-मृदुलघुवर्गे वारुणे विष्णुदैवे ॥ मरुददितिधनिष्ठे शोभने वासरे च ॥ त्रिदशमदनजन्मैकादशे शीतरश्मौ विबधकृतिरिहेष्टा चन्द्रतारानुकूले ॥ ६ ॥ सौम्यायने सिते पक्षे समये शुद्ध एव हि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चरध्रुवमृदुक्षिप्रे नक्षत्रे सौम्यवासरे ॥ ७ ॥ सुक्षणे वा सुनक्षत्रे सुतिथौ विष्टिनिर्गते ॥ देवारा-
मतडागादेः प्रतिष्ठा शुभदा स्मृता ॥ ८ ॥ अथ गोचरविचारः ॥ रविस्त्रिषड्दशायस्थश्चन्द्रः साद्ये
स्मरेषु च ॥ कुजो दशविहीनेषु बुधो युग्मे व्ययं विना ॥ ९ ॥ देवाचार्यस्त्रिकोणायद्विसप्तस्था-
नसंस्थितः ॥ शुक्रः सप्तारिदिग्वर्ज्ये शनिर्भौमिसमः शुभः ॥ १० ॥ राशिप्रवेशे सूर्यारौ मध्ये शु-
क्रबृहस्पती ॥ प्रान्तस्थौ शनिशीतांशु फलदौ सर्वदा बुधः ॥ ११ ॥ अथ गोचरप्रसंगात्पल्लीपत-
नशरटावरोहफलमाह ॥ पल्याः प्रपतने चैव शरटस्य प्रहरोहणे ॥ फलं वक्ष्यामि यत्नेन गर्गा-
दिमुनिभाषितम् ॥ १२ ॥ शीर्षे राज्यश्रियः प्राप्ति-र्ल्ललाटे भयवर्द्धनम् ॥ कर्णयोर्भूषणप्राप्ति-
र्नेत्रयोर्भयदर्शनम् ॥ १३ ॥ नासिकायां च सौभाग्यमधरे सौख्यवर्द्धनम् ॥ ग्रीवायां सुखसंपत्ति-
र्म्मुखे मिष्टान्नभोजनम् ॥ १४ ॥ कण्ठे नित्यप्रियप्राप्तिः स्कन्धयोर्विजयं भवेत् ॥ स्तनयुग्मे च



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सौभाग्यं हृदये सौख्यवर्द्धनम् ॥ १५ ॥ कुक्षौ सत्पुत्रलाभः स्यात्पृष्ठे लाभो भवेद्ध्रुवम् ॥
पार्श्वयोः प्रमदालाभो वन्धुवर्गस्य दर्शनम् ॥ १६ ॥ कट्यां वस्त्रस्य लाभः स्याद्गुह्ये मित्रसमाग-
मः ॥ जघनेर्थक्षयो नित्यं गुदे रोगभयं भवेत् ॥ १७ ॥ लिंगदेशे भवेत् पीडा स्त्रीविश्लेषोपि
जायते ॥ धनवाहनसंप्राप्तिर्जानुयुग्मेऽर्थसंग्रहः ॥ १८ ॥ विरोगी जंघयोश्चैव पादयोर्भ्रमणं भ-
वेत् ॥ रोहणं चोदर्ध्ववक्त्रश्च अधोवक्त्रः प्रपातकः ॥ १९ ॥ भवेद्यदि च शीघ्रेण तत्फलं जायते
ध्रुवम् ॥ अथ लग्नफलम् ॥ मेषे सुखं च विज्ञेयं वृषे च पशुनाशनम् ॥ मिथुने रोगसंप्राप्तिः क-
र्क्के कलहमेव च ॥ २० ॥ सिंहे पुत्रस्य लाभश्च कन्यालग्ने धनक्षयः ॥ तुलवृश्चिककोदण्डे पुत्र-
लाभो भवेद्ध्रुवम् ॥ २१ ॥ अथ रोगोत्पत्तौ क्लेशदिवसविचारः ॥ अश्विन्यां कृत्तिकायां च मूल-
र्क्षेपि तथैव च ॥ रोगोत्पत्तिर्भवेद्यस्य नवाहान्मोक्षमाप्नुयात् ॥ २२ ॥ भरण्यामुत्तरे भाद्रे रोहि-

For Private and Personal Use Only

व्य० ण्यामदितिद्वये ॥ सप्तरात्रेण मुक्तिः स्याद्व्याधेरित्याह नारदः ॥ २३ ॥ सौम्ये वैश्वे तु मासेन विं- २०
॥३३॥ शत्या च मघासु च ॥ विशाखायां धनिष्ठायां हस्ते पक्षान्न संशयः ॥ २४ ॥ वारुणश्रुतिचित्रासु
द्वादशाहेन मुक्तिदः ॥ मासेनोत्तरफल्गुन्यां रोगमुक्तिर्विधीयते ॥ २५ ॥ रेवत्यां मित्रभे चैव कृ-
च्छ्राज्जीवति मानवः ॥ त्रिपूर्वाहिशिवस्वातीज्येष्ठासु नहि जीवति ॥ २६ ॥ अथ निश्चितनिधनकारक-
योगाः ॥ उरगशतभिषार्द्रा-स्वातिशक्रत्रिपूर्वा-भरणिरविजभौमे चार्कवारे नवम्याम् ॥ प्रथमतिथिचतु-
र्थी द्वादशीभूतषष्ठीशिवहरिगुरुयोगाद्रोगिणां काल एषः ॥ २७ ॥ सर्प्पप्रचेतश्शिवभैर्न्नवमी शनि-
संगमात् ॥ योगः शिवः समाख्यातो रोगिणां कालदो मतः ॥ २८ ॥ स्वातीशक्रत्रिपूर्वासु चतुर्थी
प्रतिपद्यदि ॥ भौमे भीतिकरो योगो हरिर्न्नाशाय रोगिणाम् ॥ २९ ॥ भरण्यां पंचमी षष्ठी द्वाद-
शी रविवासरे ॥ ज्ञे यो गुरुर्म्महायोगो रोगिणां कालदो मतः ॥ ३० ॥ सप्ताहं वारदोषेण द्विगुणं ॥३३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिथिवारतः ॥ तिथिनक्षत्रतो मासं त्रिभिः कालो न संशयः ॥ ३१ ॥ आधाने जन्मनक्षत्रे प्रत्यरौ-
निधनेपि वा ॥ यस्य व्याधिस्समागच्छेत् क्लेशाय निधनाय च ॥३२॥ अथोत्पातरूपानिष्टकालमाह ॥
दक्षिणस्यां दिशि च्छायामात्मनो यः प्रपश्यति ॥ स्नायाद्द्वयंपदाभूमौ पश्यत्येव शिरो द्वयम् ॥३३॥
आत्मच्छायां शिरोहीनं सूर्याचन्द्रमसोर्द्वयम् ॥ उभयोश्चैव यच्छिद्रं प्रपश्यत्युदयास्तयोः ॥ ३४ ॥
स्वप्ने प्रेतपरिष्वंगस्तद्दर्शनमथोपि वा ॥ गृहे यस्याशनेः पातो महोल्कापतनं तथा ॥ ३५ ॥ म-
त्स्यकच्छपपातश्च निशाथे चापदर्शनम् ॥ अरुंधती न दृश्या च शीर्षे गृध्रादपोपि वा ॥ ३६ ॥
एतान्यनिष्टचिह्नानि यदा भूयो भवन्ति च ॥ तदा स गच्छेच्चपलं गंगां नरकतारिणीम् ॥ ३७ ॥
मृत्युस्तस्य दशाहेन सप्तरात्रेण कस्य वा ॥ पंचाहे कस्य चिज्ज्ञेयः कस्य चित्पक्षगोचरः ॥३८॥ यदि
देवद्विजातीनां पूजनादिकमाचरेत् ॥ तथापि दुर्लभं ज्ञेयमायुस्तस्य मनीषिभिः ॥३९॥ अथौषधदिनम् ॥

For Private and Personal Use Only

व्य० मूलानलानिलदितीन्द्रकरेज्यचन्द्राः पौष्णाश्विनीद्रविणकेशवमित्रचित्राः ॥ भैखज्यभक्षणविधौ नियतं २०
॥३४॥ नराणां निघ्नन्त्यरिष्टशतमप्यचिरात्तनुस्थम् ॥४०॥ द्व्यंगोदये गरुबुधेन्दुसिते च तेषां वारे रवेश्च सुविधौ
सुतिथौ सुयोगे ॥ जन्मर्क्षविष्टिरहितं त्वपहृत्य रोगान् कन्दर्पतुल्यवपुषं पुरुषं करोति ॥ ३१ ॥ पु-
ष्यो हस्तस्तथा ज्येष्ठा विशाखा चोत्तराश्विनो ॥ शुभान्येतानि धिष्णानि वेधेवस्थौविरेचने ॥३२॥ अथ
रोगमुक्तस्नानविचारः ॥ दशमी नवमो चैव प्रतिपच्च त्रयोदशो। द्वितीया च विशेषेण कृच्छ्रस्नाने
विवर्जयेत् ॥ हस्ते पुष्ये तथा शक्रे सौम्यादृश्विहरित्रये ॥ स्नायाद्रोगविनिर्म्मुक्त आरो-
ग्याय शुभाप्तये ॥ ४३ ॥ निषिद्धेन्दौ व्यतीपाते भद्रायां विन्दुभार्गवे । रिक्ते तिथौ चरे लग्ने स्नानं
रोगविमुक्तितः ॥ ४४ ॥ चन्द्राशुद्धे व्यतीपाते भौमार्कशनिवासरे ॥ व्रणमुक्तो व्याधिमुक्तः सदा·
स्नानं समाचरेत् ॥ ४५ ॥ ताराचन्द्रानुकूलेहि यदा रोगैः प्रपीडाते । तदा द्वित्रिदिनं दुःखं न मृत्य ॥३८॥

र्म्मृत्युभेपि न ॥ ४६ ॥ धर्म्मकर्म्मानुरक्तो यः सत्यवाक् पथ्यभक्षकः स्वल्पनिद्रः स्वल्परतिर्दीर्घ-
जीवी स एव हि ॥ ४७ ॥ यथा दयारामधरामरोभूत्खौआलवंशाम्बुजनित्यभानुः ॥ सदैव धर्म्मप्रतिपा-
लनार्थं शास्त्रावलोकी खलु दीर्घजीवी ॥ ४८ ॥ पुत्रस्तस्य महामहोपाध्याय इति सहितोपाध्यायपूर्वः कृती श्री-
मन्नन्दनसंज्ञकः समभवत्तातायुरुव्ययशः । वक्ता वेदगुरोः समस्तसुनिपुणोविद्याविवादोद्यमे नेपाल-
क्षितिपालदत्तमिथिलाभूमण्डलाखण्डलः ॥ ४९ ॥ तज्जाताः सप्तसप्तर्षिसमाः स्वस्वगुणेन च । ना-
नाविद्यानिधानास्ते न परद्रोहचिन्तकाः ॥ ५० ॥ एकस्तेषु सरस्वतीवरबलः श्रीभानुनाथाभिधश्चक्रे
चक्रधरं प्रणम्य शिरसा भूयः प्रसन्नाननम् ॥ श्रीयुक्तं व्यवहाररत्नमखिलं सत्षष्ठिवर्षाधिपः शाके
वह्निनवाद्रिभूपरिमिते मासे तपस्ये शुभे ॥ ५१ ॥ मर्य्यादानेकदेशस्य स्वग्रन्थे स्थापितापरैः ॥ मया
स्वदेशमात्रस्य व्यवहारः प्रदर्शितः ॥ ५२ ॥ आनुष्टुभै रेव कृतं समस्तं छन्दोभिरन्यैः क्वचिदात्म-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बुद्ध्या । यत्तद्दृष्टोरर्थसुखार्थमेवं ध्रुवं न जानातु सुहृन्मनीषिः ॥ ५४ ॥ नाधीतं शब्दशास्त्रं न-
व्य० वरसरुचिरं काव्यवर्गादिकं वा कोषो वालंकृतिर्वा स्मृतिरपि सकला तन्त्रविद्यापि नैव । वाणी- २०
॥३५॥ मात्रप्रसादादविकलमनसा शास्त्रसारं निरुक्तं प्रध्वस्तं तत्र यद्यत्खलजनकुधिया सज्जनैः क्षम्यतान्त-
त् ॥ ५५ ॥ * ॥ इति-खौआलकुलानन्दचन्दननन्दनोपाध्यायसुत-श्रीभानुनाथदैवज्ञविरचिते व्य-
वहाररत्ने गृहागमनादिप्रकरणम् ॥ * ॥ शुभमस्तु * समाप्तश्चायं ग्रन्थः ॥ ॥३५॥

TIPPANI KRIT, PRADARSHAKA,

PANDITA, SADÁ SHIVA JHÁ.

at, Parasaramá,, P. O. Sukhapur.

*District Bhágalapur.*

S. JO. JAY KÁNL JHÁ.

For Private and Personal Use Only

श्री गणेशाय नमः ॥ अथ ग्रन्थबहिर्भूतबहूपकारिनिर्णयः ॥ प्रथमादिमासोत्पन्नदंतफलम् ॥ मासे चेत्प्रथमे भवेत्सदशनो बालो विनश्येत्स्वयं हन्यात्स क्रमतोऽनुजातभगिनीमात्रग्रजान्द्व्यादिके ॥ षष्ठादौ लभते हि भोगमतुलं तातात्सुखं पुष्टतां लक्ष्मीं सौख्यमथो जनौ सदशनोवोर्ध्वं स्वपित्रादिहा ॥ १ ॥ अथ प्रश्नलग्नाद्वैधव्ययोगमाह ॥ षष्ठाष्टस्थः प्रश्नलग्नाद्यदीं दुर्लग्ने क्रूरः सप्तमे वा कुजः स्यात् ॥ मूर्त्तोर्विदुः सप्तमे तस्य भौमो रंडा सा स्यादष्टमंवत्सरेण ॥ २ ॥ अथ नाडीकूटमाह ॥ ज्येष्ठारौद्रार्य्यमांभःपतिभयुगयुगं दास्रभं चैकनाडी पुष्यंदुत्वाष्ट्रमित्रान्तकवसुजलभं योनिबुध्न्ये च मध्या ॥ वाय्वग्निव्यालविश्वोडुयुगयुगमथो पौष्णभं चापरास्याद्दम्पत्यो रेकनाड्यां परिणयनमसन्मध्यनाड्यां हि मृत्युः ॥ ३ ॥ अथ यात्रायां विशेषमाह ॥ नास्यामृक्षं न तिथिकरणं नैव लग्नस्य चिन्ता नो वा वारो न च लवविधिर्नो मुहूर्तस्य चर्चा० ॥ नो वा योगो न मृतिभवनं नैव यामित्रदोषो गोधूलिः सा मुनिभिरुदिता सर्वकार्य्येषु शस्ता ॥ ४ ॥ अथ गोधूलीलक्षणमाह ॥ पिंडीभूते दिनकृद्धेमन्तर्त्तौ स्यादर्द्धास्ते तपसमये गोधूलिः ॥ सम्पूर्णाऽस्ते जलधरमालाकाले त्रेधा योज्या सकलशुभे कार्यादौ ॥ ५ ॥ अथ यात्रायां विशेषयोगाधियोगमाह ॥ एको ज्ञेज्यसितेषु पंचमतयः केन्द्रेषु योगस्तथा द्वौ चेत्तेष्वधियोग एषु सकला योगाधियोगः स्मृतः ॥ योगे क्षेममथाधियोगगमनं क्षेमं रिपूणाम्बधं चाथो क्षेमयशोवनीश्च लभते योगाधियोगे व्रजेत् ॥६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा च कश्यपः ॥ पंचमे ज्ञो रविः षष्ठे वर्त्तते नवमे गुरुः ॥ भाग्ययोगाभिधे योगे निहन्ता वैरिणां सदाः ॥ ७ ॥ अथ कन्यावरणं ( शकुनम् ) विश्वस्वातीवैष्णवपूर्वात्रयमैत्रैर्व्वसवाग्नेयैर्व्वा करपीडोचितर्क्षैः ॥ वस्त्रालंकारादिसमेतैः फलपुष्पैः संतोष्यादौ स्यादनु कन्यावरणं हि ॥ ८ ॥ अथ वरवरणं ( तिलकम् ) ॥ धरणिदेवोथ वा कन्यकासोदरः शुभदिने गीतवाद्यादिभिः सय्युँतः ॥ वरवृतिं वस्त्रयज्ञोपवीतादिना ध्रुवयुतैर्व्वह्निपूर्व्वात्रयैराचरेत् ॥ ९ ॥ पूर्व्वात्रितयमाग्नेयमुत्तरात्रितयं तथा । रोहिणी तत्र वरणभगणः शस्यते सदा ॥ १० ॥ उपवीतं फलं पुष्पं वासांसि विविधानि च । देयं वराय वरणे कन्याभ्राता द्विजेन वा ॥ ११ ॥ चुल्लोस्थापनम् ॥ तुरगयमविशाखाब्राह्मचसौम्योत्तरेषु ज्वलनजलधनिष्ठामूलशूलायुधेषु ॥ रविशनिकुजवारे चुल्हिका स्थापनीया ज्वलनशुचितधीरव्यञ्जनस्वादुकर्त्री ॥ १२ ॥ अथ सप्तसकारयोगो वास्तुकर्मणि ॥ शनिः स्वातौ हरिल्लग्नः श्रावणः शुक्लपक्षकः । सप्तमो शुभयोगश्च वास्मे सर्व्वार्थसिद्धिदः ॥ १३ ॥ श्रीपंचम्याः शकुनभाषया ॥ सिंहाटार सगुण्डाटार भल नहि होय गिरै जोँ फार ॥ बडदा मूतै खेत दहाय मरै बैल जोँ बैल पडाय ॥ १४ ॥ नास नमे तो नमे किसान लदहा टूटे हो मन हान ॥ कूदे लादे बोलै सोइ कहै डाक घर लछमी होइ ॥ १५ ॥ इति० शम् ॥ S. S. J.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ वंशावली प्रदर्शकसंशोधकयोः ॥ अखिलवरकुलानां मैथिलानां सदा यः शतलखय-सतौलाख्योस्ति मान्योन्ववायः ॥ अभवदवनिदेवस्तत्र झोपाधिरिज्यः सुकुलकुमुदचन्द्रः श्रोत्रियो "रामचन्द्रः" ॥१॥ "नीलाम्बरो"ऽभूत्तनयस्तदोयस्तदीय"आँखो"ति सुभद्रशाखी ॥ "श्रीलालशर्म्मा" तत आसुधर्म्मा सत्कीर्त्तिचन्द्रोंश्चितभालचन्द्रः ॥ २ ॥ तत्तोको "रविनाथ" ईश इतवान्तत्सूनुनाऽऽलोकितं श्रीमद्धोर"सदाशिवेन" विदुषां तुष्ट्यै कृता टिप्पणी ॥ शाब्दन्यायवराटवीबुधकरि-श्रीकेसरी राजते यः कौ तस्य "यशोधरस्य विदुषः शिष्येण काश्याम्मुदा ॥ ३ ॥ जमुनी-जजिबाल-सरोजविरोचनशास्त्रपयोधि"सभादिपतेः ॥ तनया[१]त्मजजेन धरापति"कीर्त्तिधर"प्रतिपालितशास्त्रविदा ॥४॥ संशो०वं०॥ पगुलबाडान्ववायोद्भवो मैथिलो धरणिदेवोऽभव"ब्द्धाइनाथो"महान् ॥ तनय

(१) तनयाया आत्मजजस्तेन ) ( दौहित्रपुत्रेणेत्यर्थः )

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इज्यस्तु "वच्चा" तदीयस्सुधीस्तनुज ईशार्च्चकस्तस्य कीर्त्या युतः ॥१॥ वेदचक्षुर्व्वराब्जेनसत्कीर्त्तिच-
"न्द्रैकनाथ" प्रशिष्यः स्वमुद्रापयत् ॥ द्विद्विनागेन्दुशाके तपोवीध्रवाणे "जयादिः कवौ कान्त"
इत्यार्य्यवित् ॥ २ ॥ "प्रद० सं० वि०" ॥ भ्रमात्प्रमादतोपि वा सुधीधनैरनर्गलं प्रशोध्य पा-
ठ्यमत्र यत्कृपाकटाक्षसद्युतैः ॥ कदापि गच्छतो महीयसः प्रपातनं यदि हसन्त्यसाधवस्समा-
दधत्यलं हि सज्जनाः ॥ ३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir


| विषयनामानि | पत्रं | पृष्ठः | पं० |
|---|---|---|---|
| मंगलाचरणं | ...३ | १ | १ |
| विशेषमाससंज्ञा | ...३ | १ | ८ |
| तिथीशाः | ...३ | २ | ३ |
| तिथीनांविशेषसंज्ञा | ...३ | २ | ५ |
| सिद्धियोगाः | ...३ | २ | ६ |
| निन्द्ययोगाः | ...३ | २ | ८ |
| दग्धतिथिः | ...४ | १ | १ |
| भद्राविचारः | ...४ | १ | ३ |
| भद्रावासः | ...४ | १ | ७ |
| चन्द्रावस्थितिराशिविशेषेण भद्रावस्थितिः ... ... | ...४ | २ | १ |
| नक्षत्रस्वामिविचारः | ...४ | २ | ४ |
| नक्षत्राणां विशेषसंज्ञा | ...४ | २ | ७ |
| ताराविचारः | ...५ | १ | ३ |
| दुष्टताराशान्तिः | ...५ | १ | ५ |
| चन्द्रावस्थितिविचारः | ...५ | १ | ६ |
| मेषादीनां संज्ञान्तरम् | ...५ | १ | ८ |
| चन्द्रानयनम् | ...५ | २ | १ |
| चन्द्रवर्णज्ञानम् | ...५ | २ | ३ |
| चन्द्रतारावलकथनम् | ...५ | २ | ५ |
| निषिद्धचन्द्रस्य शान्तिः | ...५ | २ | ८ |
| अथ घातचन्द्रम् | ...५ | २ | ९ |
| वारविचारः | ...६ | १ | ६ |
| अर्द्धप्रहराविचारः | ...६ | १ | ९ |
| दिनर्क्षकुयोगम् | ...६ | २ | २ |
| समयाशुद्धिः | ...६ | २ | ५ |
| मन्वादियुगादिविचारः | ...७ | १ | १ |
| उत्पातविचारः | ...७ | १ | ९ |
| वास्तुभूमिज्ञानं | ...७ | २ | ६ |
| राशीनां वासस्थानम् | ...८ | १ | ५ |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | प० | पृ० | पं० |
|---|---|---|---|
| ग्रामवासे धारोपधारज्ञानं | ८ | १ | ६ |
| नामराशितो ग्रामराशिविचार: | ८ | २ | १ |
| ग्रामचक्रविचार: | ८ | २ | २ |
| ग्रामनाम्नोर्वर्गविचार: | ८ | २ | ५ |
| वर्गविचार: | ८ | २ | ७ |
| शरविचार: | ८ | २ | ९ |
| वास्तौ दिशाविचार: | ९ | १ | १ |
| गृहारम्भे मासविचार: | ९ | १ | ४ |
| पक्षशुद्धि: | ९ | १ | ७ |
| तिथिशुद्धि: | ९ | २ | १ |
| नक्षत्रविचार: | ९ | २ | ५ |
| गृहारम्भे वारविचार: | ९ | २ | ७ |
| योगशुद्धि: | ९ | २ | ८ |
| सन्मुस्वराहुवि० | १० | १ | १ |
| गृहे शिल्पादिक्रियावि० | १० | १ | ५ |
| गृहकरणार्थं वास्तुवि० | १० | १ | ९ |
| लग्नशुद्धि: | १० | २ | २ |
| सामान्यतोगृहशुद्धिवि० | १० | २ | ४ |
| गृहप्रवेशवि० | १० | २ | ५ |
| मासविचार: | १० | २ | ८ |
| तिथविचार: | ११ | १ | १ |
| नक्षत्रविचार: | ११ | १ | २ |
| वामरविविचार: | ११ | १ | ४ |
| चुह्लिकोपरि मृद्भाण्डस्थापनवि० | ११ | १ | ५ |
| प्रवेशविधानमाह | ११ | १ | ६ |
| गृहदेव्या:स्थापनविधि: | ११ | १ | ८ |
| गृहसमीपे शुभाशुभवृक्षकथनं | ११ | २ | ७ |
| वृक्षरोपणदिवसमाह | १२ | १ | ६ |
| हलप्रवाहेतिथिशुद्धि: | १२ | २ | ३ |
| नवान्नभक्षणवि० | १२ | २ | ७ |


॥३८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir


| | प० | पृ० | पं० |
|---|---|---|---|
| निषिद्धविचारः | ...१२ | २ | ९ |
| अथ नूतनताम्बूलभक्षवि० | ...१३ | १ | २ |
| धान्यादिमर्दनस्थानं | ...१३ | १ | ४ |
| मेधिस्थापनविचारः | ...१३ | १ | ६ |
| कणमर्दनार्थदिवस वि० | ...१३ | २ | १ |
| वीजरक्षणदिवसवि० | ...१३ | २ | ३ |
| गृहादौधान्यादिस्थापनवि० | ...१३ | २ | ५ |
| धान्यनिष्काशनवि० | ...१३ | २ | ७ |
| वृद्ध्यर्थधान्यादिप्रक्षेपादि० | ...१३ | २ | ९ |
| धान्यादिमूल्यज्ञानार्थवि० | ...१४ | १ | २ |
| रव्यादिवारेसंक्रमणफ० | ...१४ | १ | ४ |
| पूर्वाह्नादिषुसंक्रान्तिफ० | ...१४ | १ | ६ |
| पुण्यकालव्यवस्था | ...१४ | २ | १ |
| प्रथमहट्टावासचक्रवि० | ...१५ | १ | १ |
| अस्य फलविचारः | ...१५ | १ | ४ |
| क्रयविक्रयवि० | ...१५ | १ | ८ |
| द्रव्याणामृणदानप्रयोगवि० | ...१५ | २ | १ |
| गवांक्रयविक्रयवि० | ...१५ | २ | ४ |
| वाजिनांक्रयविक्रयवि | ...१५ | २ | ७ |
| अश्वादियानारोहणं | ...१६ | १ | २ |
| गजदन्तच्छेदनादि० | ...१६ | १ | ३ |
| मंत्रगृहणदिवसमाह | ...१६ | १ | ६ |
| नक्षत्रशुद्धिः | ...१६ | २ | ३ |
| मैत्रीकरणादि० | ...१६ | २ | ७ |
| विवाहतिथिः | ...१७ | १ | १ |
| गणविचारः | ...१७ | १ | ८ |
| योनिविचारः | ...१७ | २ | ६ |
| वधूप्रवेशविचारः | ...१८ | १ | ३ |
| द्विरागमनं | ...१८ | २ | २ |
| नवोनशय्याद्यारोहणं | ...१९ | १ | ७ |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | प० | पृ० | पं० |
|---|---|---|---|
| उद्वर्तनादिवि | …१९ | १ | ९ |
| वस्त्रप्रक्षालनवि० | …१९ | २ | १ |
| तैलाभ्यंगवि० | …१९ | २ | २ |
| पैलाभ्यंगे निषिद्धविचारः | …१९ | २ | ४ |
| पुंसां वस्त्रधारणदि० | …१९ | २ | ६ |
| पुंसां भूषणपरिधानदि० | …१९ | २ | ८ |
| स्त्रीणां वस्त्रपरिधानदि० | …२० | १ | १ |
| स्त्रीणां भूषणपरिधानदि० | …२० | १ | ४ |
| निषिद्धदिवसवि० | …२० | १ | ६ |
| आद्यपाकारम्भमैथुनदि० | …२० | १ | ७ |
| स्त्रीणां केशवन्धनदि० | …२० | १ | ८ |
| आद्यरजोदर्शनवि० | …२० | २ | ३ |
| प्रथमर्तौपरिधानवस्त्रफ० | …२० | २ | ७ |
| वेलाफलम् | …२० | २ | ९ |
| शोणितवर्णफलम् | …२१ | १ | ३ |
| स्थानफलम् | …२१ | १ | ६ |
| स्नानविचारः | …२१ | १ | ८ |
| गर्भाधानवि० | …२१ | १ | ९ |
| विहितदिनानि | …२१ | २ | ४ |
| तिथिविचारः | …२१ | २ | ८ |
| नक्षत्रविचारः | …२१ | २ | ७ |
| पुंसवनं | …२१ | २ | ९ |
| सीमन्तकर्म्मवि० | …२२ | १ | १ |
| गर्भाधानसमयवि० | …२२ | १ | ३ |
| सूतिकागृहनिर्म्माणवि० | …२२ | २ | ७ |
| शिशोर्म्मातुस्तनपानवि० | …२३ | १ | २ |
| शिशूनांपालनाशयनादि० | …२३ | १ | ५ |
| शिशोर्नामकरणं | …२३ | १ | ७ |
| दोलाद्यारोहणं | …२३ | २ | ३ |
| ताम्बूलदानादि० | …२३ | २ | ८ |




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir


| | प० | पृ० | पं० |
|---|---|---|---|
| शिशोर्गृहान्निष्क्रमणदि० | …२३ | २ | ७ |
| शिशुनांभूम्युपवेशनं | …२३ | २ | ८ |
| अथान्नप्राशनं | …२४ | १ | १ |
| शिशोराद्यक्षौरदि० | …२४ | १ | ४ |
| नित्यक्षौरदि० | …२४ | १ | ७ |
| आथाद्यश्मश्रुकर्म्म | …२४ | २ | १ |
| कर्णवेधः | …२४ | २ | २ |
| अथाक्षरविद्यारम्भविचारः | …२४ | २ | ४ |
| अथोपनयनदिवसविचारः | …२४ | २ | ८ |
| अथव्रात्यकालवि० | …२५ | १ | १ |

| | प० | पृ० | पं० |
|---|---|---|---|
| अथ गुरुशुद्धिः | …२५ | १ | ३ |
| अनिष्टगुरुशान्तिः | …२५ | १ | ५ |
| अथ रविशुद्धिः | …२५ | १ | ७ |
| अथ मासशुद्धिः | …२५ | १ | ९ |
| अथोपनयनेचैत्रप्रशंसा | …२५ | २ | ६ |
| अथशाखाधिपवलम् | …२५ | २ | ७ |
| अथ तिथिशुद्धिः | …२६ | १ | ३ |
| अथं नक्षत्रशुद्धिः | …२६ | १ | ४ |
| अथ तत्कालिकानध्यायः | …२६ | १ | ५ |
| अथ गलगृहलक्षणं | …२६ | १ | ८ |

| | प० | पृ० | पं० |
|---|---|---|---|
| अथ प्रदोषलक्षणं | …२६ | २ | ९ |
| अथाकालवृष्टिलक्षणं | …२६ | २ | १ |
| अथ लग्नशुद्धिः | …२६ | २ | २ |
| अथ विद्यारम्भः | …२६ | २ | ४ |
| अथ धनुर्विद्यारम्भः | …२६ | २ | ७ |
| अथ छूरिकाबन्धनं | …२६ | २ | १ |
| अथ राजाभिषेकः | …२७ | १ | १ |
| अथ मासशुद्धिः | …२७ | १ | ८ |
| अथ तिथिशुद्धिः | …२७ | १ | ९ |
| अथ नक्षत्रशुद्धिः | …२७ | २ | २ |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | प० | पृ० | पं० |
|---|---|---|---|
| अथ बारशुद्धिः | …२७ | २ | ७ |
| अथानन्दादियोगः | …२८ | १ | १ |
| अथानन्दादियोगानयनं | …२८ | १ | ४ |
| अथराशिभेदनदिक्षुचंद्रावस्थितिः | २८ | ९ | १ |
| अथ लालाटिकयोगः | …२८ | २ | ३ |
| अथयोगिनी वि० | …२८ | २ | ६ |
| अथ राहुविचारः | …२१ | १ | ५ |
| अथ वारराहुवि० | …२९ | १ | ८ |
| अथ यामार्द्धराहुवि | …२९ | २ | २ |
| अथ राहुयुक्तयोगनीवलवि० | …२९ | २ | ४ |
| अथ गृहयोगेन यात्रावि० | …२९ | २ | ६ |
| अथ यात्राव्यवस्था | …३० | १ | ९ |
| अथ शकुनाः | …३० | २ | ६ |
| अथापशकुनाः | …३१ | १ | २ |
| अथ नौकायानं० | …३१ | २ | ३ |
| अथनृपदर्शनं० | …३१ | २ | ६ |
| परदेशगः कदा समागमिष्यति अस्योत्तरं … | …३१ | २ | ७ |
| पुष्करण्यादिखननदिवसमाह | …३२ | १ | २ |
| अथ तिथिविचारः | …३२ | १ | ४ |
| अथ देवताघट्टनमु० | …३२ | १ | ७ |
| अथ गोचरवि० | …३२ | २ | २ |
| गोचरप्रसंगात्पल्लीपतनशरटा-वरोहक० … | …३२ | २ | ५ |
| लग्नफलम् | …३३ | १ | ६ |
| अथरोगोत्पत्तौक्लेशदिवसवि० | ३३ | १ | ८ |
| अथ निश्चितनिधनकारयोगा | …३३ | २ | २ |
| अथोत्पातरूपानिष्टकालम् | …३४ | १ | ४ |
| अथौषधदिनम् | …३४ | १ | ९ |
| अथ रोगमुक्तस्नानवि० | …३४ | २ | ४ |




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir


| | प० | पृ० | पं० |
|---|---|---|---|
| प्रथमादिमासोत्पन्नदन्तफ० | ...३६ | १ | १ |
| प्रश्नलग्नाद्वैधव्ययो० | ...३६ | १ | ३ |
| नाडीकूटम् | ...३६ | १ | ४ |
| यात्रायां विशेषयो० | ...३६ | १ | ७ |
| गोधूलीलक्षणं | ...३६ | १ | ८ |
| यात्रायां योगाधियो० | ...३६ | १ | १० |
| कन्यावरणं ( शकुनं ) | ...३६ | २ | १ |
| वरवरणं ( तिलकं ) | ...३६ | २ | ३ |
| चुह्लीस्थापनदि० | ...३६ | २ | ६ |
| वास्तौ सप्तसकारः | ...३६ | २ | ७ |
| श्रीपंचमीहलफ० | ...३६ | २ | ८ |
| वंशावली | ...३७ | १ | १ |


( इतिव्यवहाररत्न-सूची ) ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra
www.kobatirth.org
Acharya Shri Kailassagarsuri Gyanmandir


॥४१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

BENARES:

Jaggeshar Press.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# इति व्यवहाररत्नम्० ।

"परसरमा" राजधान्यधिप-रा० कु० बाबू-श्रीमत्कीर्त्तिधरनारायणसिंहविजय-
पालित-पं० वर-श्रीसदाशिवशर्म्म" प्रदर्शितरीत्या वनैली-राजज्यो०
श्रीमज्जयकान्त-शर्म्मणा शोधितम् ॥ मूल्यं ॥)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only